॥अथोपचारसारग्रंथप्रारंभःश्रीव्यंकटेश॥

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीसरस्वत्यैनमः॥श्री
गुरुभ्योनमः॥श्रीयोगेश्वर्यैनमः॥श्रीलक्ष्मीव्यंकटेशायनमः॥
१ नत्वागणेशगणनायकंरघुपतिंसूर्यंतथाशंकरंवाणीमुपचार॰
स्मारेकठिणांश्रुतिबोधामतांज्योतिर्विनिनयःसुखावबि
दुषांशांतित्यगोत्रोद्भवोगोत्रप्याक्पुरेवसन्दिनकरष्टीकां
करोमिस्फुटां॥१॥तथैवपितरौवंदेगंगानंतोसुशोभनो॥
तत्प्रसादादहंवक्ष्येटीकांगुटप्रकारिकां॥२॥इतिटीकाकार
स्यमंगलाचरणं॥अथउपचारसारग्रंथस्यप्रारंभः॥श्लोक
॥त्रिलोकेशंत्रिकालेशंत्रितापघ्नंपरंविभुंकुंदोवक्ष्येनतो
हंचारसारंभिषग्वरे॥१॥टीका॥ग्रंथकर्त्राशिष्टाचारप्राप्तंवि
घ्नविघातद्वारा ग्रंथसमाप्तेमंगलमाचरति॥मुकुंदोभिषक्॰ १
त्रिलोकेशादिविशिष्टंरविंसूर्यंनत्वाभिषजांवैद्यानांमुदेक॰

थमिउपचारसारंअन्वर्थकंनामइतरेषांउपचारग्रंथानांअयंसा
रभूतत्वात्तेनचकिंचाग्दाराकरोतीत्यर्थः॥१॥श्लोक॥यदुक्तं
ऋषिभिःकृत्यैःसकृत्तानोपचारयुक्॥नानाभेदंचतद्दृष्ट्वात्यो
षधात्यप्रयोगिकं॥२॥टीका॥यदुक्तंऋषिभिःग्रंथकर्तृभिः शास्त्रसि
द्धांतकर्तृभिःसिद्धैःरसवादकर्तृभिःआद्यैअर्वाचीनाःतैरुक्तं
ज्ञानंउपचारयुक्तेनसहितंअनेकभेदंचतद्दृष्ट्वाहत्यो
षधानिअत्यामोसेनतभ्योनिर्भयेनइत्यादीनितेषांअल्पप्र
योगाःबहुकल्पायेनभवंतितेऽल्पप्रयोगाःइत्थंसतिअल्पप्र
योगसाध्यगुणाःबहुकल्पंबहुमितुर्यंतात्तन्नउपचारसार ॥
मितिअन्वर्थकनामैवग्रंथकर्तुरित्यभिप्रायः॥बहुप्रपचारेण
सारभूतसाध्योघृतन्यायेनअल्पोषधात्यप्रयोगिकमपिव
हुगुणमितिअर्थःपूर्वश्लोकेनान्वयः॥२॥श्लोक॥तथाहिकायोर वैद्यस्य
दशांगानि
हयोयोषित्४दात्रेऽभूतंधनुर्विषटरसायनाङ्गमी९चेति

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

दरांगतःसवैद्यराट्॥३॥टीका॥वैद्यलक्षणमाह॥तथेति॥
तथामितकः॥कायंशरीरं॥वदःस्त्रीप्रासंगिकं॥योषित्स्त्री॥
२ वातंप्रथमवयः॥भूतंविशाचं॥व्रणःक्षत्यं॥विषंगरलं॥रसा
यनागमौ॥रसायनरसवादः॥आगमोमंत्रविधान॥इत्येवंप्र॰
कारैःदरांगतःदरासंलाकप्रकरणचिकित्सापरिज्ञातावैद्यरा
ट्भवति॥३॥श्लोक॥उपचारोमतेरेवंश्चापःक्रियादिभिस्मृ चतुर्वि
तेः॥रस्त्राद्यैरासवोमंत्रैःसाद्ध्येतिचतुर्विधः॥४॥टीका धोपचारः
श्लोकेनचतुर्विधोपचारमाह॥उपचारामतिः॥रसैःरसाय
नैरेषोदैविकःप्रथमउपचारःक्रियादिभिःक्रियाद्यैःआर्ष
द्वितीयःरस्त्राद्यैरास्रक्षायुग्भिःआसुरःतृतीयःमंत्रैः
वैदिकपौराणिकतांत्रिकरावणादिभिर्मंत्रैश्चतुर्थः॥एवंच २
तुःप्रकारैःउपचारश्चिकित्सामार्गस्मृतउक्तः॥४॥श्लोक॥

वैद्यलक्षण—

रुक्कृत्तानंरोगिणःसम्यक्कृतज्वरपीडानिवारणं॥एतद्वैद्यस्यवैद्यत्वं
नवैद्योजीवितप्रभुः॥५॥टीका॥एकेनश्लोकेणवैद्यलक्षण
माह॥रुगिति॥रोगिणोव्याधितस्यसम्यक्कृयथातथ्यंरुग्दानं
रोगनिदानंतज्जनितारोगजनितायापीडातस्याःनिवारणंदु
रीकरणं॥एतदेववैद्यस्यवैद्यत्वं॥जीवितस्यायुषःप्रभुर्नाऽ
स्तीत्यर्थः॥ननुरुग्दानंतिवैद्यत्वंव्यर्थंजीवितप्रभुत्वाभावा
दुच्यते॥सत्यप्यायुष्किरोगवतोऽकृतनिदानोम्रियते॥य
थासत्यपितेलेवार्तादोनश्यतिनिर्वातिस्थलेदीपेऽ
नाशोऽतिदीपोनश्यति॥एवंचगतायुषोनरस्यजीवितप्रभु
र्नभवतिइत्यनयेनवैद्यत्वस्यव्यर्थतानस्यात्॥५॥श्लोक॥ भिषक्कर्म
श्रुतिर्त्र्यंत्यद्विहैत्र्यादित्यंघ्रींदुमित्रभे॥रव्यारेज्योभिषक्कृ णिमुहूर्त
र्मनिरुक्तस्नानंकुयोगतः॥६॥टीका॥भिषक्कर्मणिमुहूर्तमा
हश्रुतीति॥श्रुतिस्त्रिश्रवणधनिष्ठारात्तारका॥अंत्याद्वैरेवती

अश्विनीहस्तचित्रास्वातीआदित्येअंघ्रिप्रवाभाद्रपदाइंदुमृग
मित्रभंअनुराधाएषुनक्षत्रेषुरव्यारेज्योःरविभौमगुरुवास
२ राःएषुवारेषुभिषक्कर्मसिद्धिंवैद्यक्रियायोग्या॥सिद्ध
स्यानंरोगनिमुक्तिस्यानंकुयोगतःसप्तम्यर्थेपंचमी॥इष्टति
थिवारनक्षत्रकरणादिषुकुर्यादित्यर्थः॥६॥श्लोकःयेध
र्मिष्ठाःसुकृतिष्ठादयादानोपकारकाः॥जितारिश्चामयस्ते
षामुपचारायोभिषक्वरैः॥७॥टीकाःअथैकेनकेचित्साध्ये चिकित्सा
योग्यानाहःयइतिःभिषग्वरैःवैद्यश्रेष्ठैःयेधर्मिष्ठाःध कर्तुयोग्य
र्मस्वभावाःसुकृतिष्ठाःशोभनकर्मकारिःदयादानोपका वैद्यः--
रकाःदयाकृपादानंप्रसिद्धंउपकारश्चतान्कतारिःजिता
रिःजितेंद्रियाःतेषामामयोरोगैःउपचेयःचिकित्साकर्तुं २
योग्याः॥७

ग्रंथांतरात्॥अभिमानविद्वेषेणनिर्द्वेयेनिर्दयेषुचानब्रूयाद्भैषधंतत्रकृतघ्नश्च चिकित्सा
विद्वेषतः॥५॥ कर्तुमयोग्यः

नोपचार्यःकदाग्घोघ्नब्रह्मघ्नग्रामकूटकाः॥विद्वेष्टवधकव्याँश्चो धा१
राश्वपचपापिनः॥८॥टीकाःचिकित्साकर्तुमयोग्यानाहःनोपे
तिःगोघ्नब्रह्मघ्नग्रामकूटकाःगोघ्नगोहंताब्रह्मघ्नोब्रह्महाग्राम
कूटकोग्रामकार्यकर्त्ताविद्वेषवधकव्याधाः॥विद्वेषाविद्वेषद्वे
ष्टावधकोभिक्षादिःव्याधोमत्स्यपक्ष्यादिजीवहंताःचोरस्तोयीश्व
पचपापिनःश्वपचश्चांडालःपापीपतितःएतेनोपचार्याःचिकि
त्साकर्तुमयोग्याः॥८॥श्लोकःयानिकृच्छ्राण्यतिसाध्यायाप्य साध्यता
रूक्षाण्यसाध्यतांजीवितंहंत्यसाध्यारूक्षनरस्यानुपचारि ध्यकथनं
णः॥९॥टीकाःअथोपेक्षावतोरोगिणोवक्ष्यत्रयमाहःयाऽ
तीतिःअनुपचारिणःचिकित्सारहितस्यनरस्यरोगैःसाध्या णः
सुचिकित्स्याकृच्छ्रोगःयाप्यतांकष्टसाध्यतांयातिगच्छतिःयाप्या
प्याकृच्छ्रसाध्यतांयातिअसाध्यारूक्षजीवितंआयुष्यंहंतिना
शयतिः॥९॥·

श्लोकः॥ननियतिकृतास्त्रीक्लोपचारेणपापिनः॥तदक
र्मविपाकोत्कंकृत्वातंवाप्युपाचरेत्॥९०॥टीकाः॥अथान्येषांरोगा
रेणरोगानाहः॥नेति॥पापिनःपातकशीलवतोनरस्य८
स्त्रीक्लोपचारेणयथातथ्यज्ञातचिकित्सेनअतिकृरमहारो
गःननियतिनगछतितदकर्मविपाकोत्कंमदनमहणंवाश्रित्य
थोत्कंकर्मविपाकंकृत्वावेतिपश्चात्तरेपुनस्तमधिरोगिणंचि
कित्सेत्॥९०॥श्लोकः॥सहगर्भेचिरोत्थाःकालागंतुस्वभा रोगाणां
वजाः॥प्रभावजाःगदाश्चैषांप्रेरकंकर्मवैयतः॥९१॥टीकाः॥ सप्तभेदः
अथरोगाणांसप्तविधप्रकारणान्याह॥सहेत्थाः॥दुष्टरो सहेति
णितशुक्रोत्पन्नाःगर्भेत्थाःदोषदुष्टगर्भजाःअपचारोत्थाःवि
षाद्यन्यथाचरणाज्जाताःकालागंतुस्वभावजाःकालजाःव ४
सांगादिकाक्लोत्पन्नाःआगंतुजाःस्त्रीक्लान्यादिजाःस्वभाव

जाःजरायाःप्रभावजाःस्नापादिनोत्पन्नाःएवंसप्तयतःएते
षांरोगाणांप्रेरकंकारणंवेनिश्चयेनकर्मजन्मांतरीयंस्मरेत्
॥९१॥श्लोकः॥सहजाःशुक्रशोत्थैर्दोषैर्ग्रंथिनिभंकरं॥कु सहजो
णपंपत्वपूयाभंविषोनिविकृतास्रुति॥१२॥[illegible]॥अथोक्त स्थारोगाः
रोगाणांस्वरूपानामाहसहजाइति॥स्त्रीपुंसोरार्तवशुक्रो
त्पन्नैर्दोषैर्वातपित्तकफैःग्रंथिनिभंकपित्थकूष्मांडफलसदृशं
विकृतास्रुतिविपरीतावयवंकरंपुष्टिरहितंकुणपंनिर्जीवं
मत्स्यपूयाभंमत्स्यपूरितत्वंविषोनिस्वयोनिजास्रुतिहीनंसर्पा
त इतित्वंयदिरारीरंभवतिँहिनिरोगारक्तशुक्रोत्थाहेया:॥१२
॥श्लोकः॥दोषैर्गर्भस्त्रवेद्योन्यांयतेस्वंजवामन॥कुक्षौधः गर्भसंभ
स्वस्रुतिःपिंगपांडुःस्त्रीत्रादिगर्भजाः॥१३॥टीकाः॥दोषैरि वारोगाः
तिः॥दोषैर्गर्भोत्थदुष्टैःवातपित्तकफैःगर्भस्त्रवेत्पतेत्॥

भुज्येतक्षुक्षोभवेत्॥म्रियतेमरणंप्राप्नुयात्॥खंजवामनौखं
जःपंगुःवामनोऽस्वेःकुब्जःवक्रःअंधःनेत्रेंद्रियवर्जितःखल
५ तिःअल्पकेशनखःपिंगःपिंगलवर्णःपांडुःश्वेतवर्णः॥श्लोक॥८
दिजाष्टादशकुष्ठवान्गर्भेजायतेएतेगर्भजारोगाःगर्भेण
सहजाताइत्यर्थः॥१३॥श्लोक॥विषभूततरुग्रावाग्निश्च विषोत्था
तानेऽपचारजाः॥कालाद्वेसप्तरीतेश्चागंतुजाश्चाग्नि रोगादि
मारुतः॥१४॥[illegible]॥[illegible]॥विषमिति॥विषभूततरु भेदाः
ग्रावाग्निक्षितान्॥विषंस्थावरंजंगमंकृत्रिमंचेतित्रिविधं॥
भूतंपिशाचादितेकर्तृकः॥ग्रावःशैलः॥अग्निर्भूतिर्दाहः॥तं८
शस्त्रादिजंव्रणरूपंएभ्योजाताये रोगास्तेऽपचारजाः॥अ
पचारोऽविचारः॥वक्ष्येऽसृग्दोषैः॥पर्जन्योऽसृग्दोषकर्त्रेभ्यो भ्र ५
ताये रोगास्तेकालजाइत्यर्थः॥अग्निमारुतः॥अग्निवायुभ्यांये

जाताये रोगास्तेआगंतुजाआकस्मिकाइत्यर्थः॥१४॥श्लोक॥जरा
क्षुत्तृट्स्वभावोत्थाःशापपूर्वोत्थाःप्रभावजाः॥रोगाभ्यःसप्तधेत्ये
षांप्रेरकंकर्मकेवलं॥१५॥टीका॥जरेति॥जरावार्धक्यंक्षुत्क्षु
धात्तृट्तृषाअभ्यवहारनायेऽोमयास्तेस्वभावोत्थाःस्वशरीरज
न्याः॥शापपूर्वोत्थाः॥ब्राह्मणादीनांशापजाःअरिःशत्रुस्तत्प्रेरि
ताः॥तपोवरबाहुबलजाताःप्रभावजाः॥एतद्वैकृतंप्रकारे
णरोगाणांसप्तप्रेरास्यः॥एतेषांरोगाणांप्रेरकंकर्मसंचितक्रि
यमाणप्रारब्धरूपंत्रिविधंकर्मदोषः॥तंनिवारयतिप्र
वेक्ष्यतिप्राप्स्यतीत्यर्थंपुनरुक्तिर्नदोषायेतिभावः॥१५॥श्लोक॥ कृतघ्नस्य
ननिष्क्रीणातियोवैद्यात्स्वागमन्नश्चिकित्सितं॥रोगीकुर्यात्तस्य दोषकथनं
तुष्यंवैद्यस्तत्फलमश्नुते॥१६॥टीका॥नेति॥अोमृत्योःवै
द्यात्चिकित्सितज्ञात्चिकित्सितंउपायैःस्वस्थीकृतंस्वांगंश
रीरंननिष्क्रीणातिवैद्योयआत्मदेहमोक्ष्यंनरतांतिस्तरोगनिर्मु

क्षोपियमुष्यकृक्षेतत्कृत्वेहमुष्मिकसुखंअश्नुतेप्राप्नोतीत्यर्थः
॥अथतत्पापमपिपुण्यवत्प्राप्नुयात्एतदर्थमेवनोपचर्याःकृ
ोघ्नइत्योघुक्तमेवग्रंथलताएवंचपापिनंपुरुषंलक्षयित्वानोपचरेत्
एवंसतिपापपुरुषभाक्कृतंभवेत्॥६॥श्लोक॥दूताद्योगमनंरोगि दूतागम
णिजनासास्वराःक्रमात्॥साध्यःसाध्यापरोसाध्योयाम्यवा नेऽचरणा
मद्वयेकृगात्॥७॥टीका॥अथस्वरज्ञानेनोक्तसाध्यासाध्यत्व नमाह
क्षणमाह॥दूतेति॥दूताद्यागमनेदूतोरोगिवान्तिहरःआधत्त
स्वरःतस्यागमनेवैद्यगृहागतेसतियाम्यद्वयेकृगात्॥या
म्योदक्षिणनासापुटगः॥वामेनामदक्षिणभिन्ननासापुटगो
वायुःद्वयेक्यगःउभयनासापुटगः॥निजनासास्वरात्स्व
नासिकावायुवेगात्अनुक्रमेणसाध्यसाध्यापरःकष्टसा
ध्यःअसाध्यश्चज्ञेयः॥७॥श्लोक॥रोगिभाद्वारभाच्चांद्रं ६
सामिजित्स्वसहक्रमात्॥साध्यःसाध्यापरोसाध्योऽन्य

ज्योतिःस्वा
स्त्रोक्तसाध्या
साध्यमाह

क्षे४।५त्र्यंगे३।६स्वभद्वये०।७।३॥९८॥अथज्योतिःस्वा८
स्त्रोक्तसाध्यादिलक्षणमाह॥रोगिभादिति॥रोगिभात्
रोगिजन्मनक्षत्रात्॥रोगिजन्मनक्षत्रा स्तानेवारभंनामय
स्मिन्वारेद्रेष्काणेवास्यवारस्ययन्नक्षत्रंतस्मात्चांद्र
नक्षत्रंअभिजितासहसप्तमंतत्सप्तहत्वाक्रमात्अ
ध्यक्षेचतुःपंचशेषेसाध्यः॥त्र्यंशेत्रिषट्शेषेसाध्यप
रःकष्टसाध्यः॥स्वभद्वयेवंश्यंभएकःद्वयंचएतच्छे
षेअसाध्यः॥वारभंज्योतिःस्वास्त्रेउक्तं॥भरण्यांभानुत
स्यन्नःसोमेचित्रांविनिर्दिशेत्॥कुजेचैवोत्तराषाढाधनि
ष्ठाचंद्रेहजे॥॥गुरुश्चोत्तरफल्गुन्यांशुक्रेज्येष्ठाप्रकी
र्तिता॥रेवतीसूर्यपुत्रस्यजन्मर्क्षंपरिकीर्तितं॥एवंक्रमेण

मन्त्रपरी
क्षा ---

साध्यादिलक्षणंजानीयात्॥१८॥श्लोक॥आत्मन्त्रमनाद्यं
तंनन्त्रतैलवान्त्रःमात्र॥साध्यःसाध्यापरोसाध्यविस्त
त्यूर्ध्वधिरोपगात्॥१९॥टीका॥मन्त्रपरीक्षयासाध्यासा
ध्यत्वमाह॥आत्मरिति॥अनाद्यंतंआद्यंतरहितमध्यवेग
जइत्यर्थः॥काचमात्रेगृह्णीयात्भयंसंत्रदायः॥तन्त्रत
स्मिन्मन्त्रेतैलवान्तैलंप्रक्षिप्तंतस्यत्रवोत्रेखाःबिंदु
रूपःतस्मान्मंत्रकथंभूतान्तैलवान्विस्तत्यूर्ध्वधिरोप
गात्॥विस्तृतिविस्तारःऊर्ध्वगःपतनंकालावस्थासद
रेखाः॥अधरोपगःअधःप्रदेशात्मन्त्रमेणरोगीसाध्यः मरणयो
साध्यापरोऽसाध्यश्चज्ञेयः॥१९॥श्लोक॥रिक्तांगार्कषष्ठ्य
तिथौवारेमंदैर्कै॥१९॥विवाहेगृहदीक्षायांमंत्रोयाम्ये
६।९॥११।२०।२५।१६।१९।२१।त्येकेकृसंभवेमृतिः॥२०॥

दीक्षा॥ज्योतिःशास्त्रोक्तप्रकारेणसाध्यादिकमाह॥रिक्ते
ति॥रिक्ताचतुर्थीनवमीचतुर्दशीअंगदग्धअर्कःषष्ठीद्वा
दशीचैतासुतिथिषुमंदःशनिःआरीभौमःअर्कःरविः॥
तेषुवारेषुतिथौविवाहेगृहदीक्षायांआद्यायांमंत्रेवापूर्वदि
वात्रयंपूर्वाफल्गुनीपूर्वाषाढाःपूर्वाभाद्रपदाःचेतिद्वंद्वेरविवा
रेसतीर्थाःतिथ्यःमंदवारेषुचेतुर्दशीसहितेषुपूर्वंवज्रक
तिथिवारनक्षत्रार्थंअन्यत्रप्रतिपदादिकंवारत्रयार्थं
हेयंत्यजेत्रक्षत्रेषुकेतोगौरीसौम्यौसूर्यतिमरंदेहेसंज्ञार्थः॥२०॥
अन्यत्रनक्षत्रयोजनार्थंअन्यत्रप्रतिपदादिकंवारत्रयार्थं आसन्नमृ
हेयंत्यजेत्रक्षत्रेषुकेतोगौरीसौम्यौसूर्यतिमरंदेहेसंज्ञार्थः॥२०॥ त्युःसन्नः
शेषाःशीतांशुभौमवारेवासुरगुरुवारेएकःशेषाःदाहोगे
वालि शीतांशुतैजसतारेवागेरे॥टीका॥हिक्कनंहिक्कासुरगुरुवारेसा
मःशीतांशुवारेउत्तमःवालिवहतिकंठकफः॥अंगेरेश्रोजमि

दाह: शिरारिव सेरी तत्तनारी नतस्त्वंगः२१॥श्लोकः कंठेरो
धः शिरस्तापः शीतस्तानाभिपत्करः नाभिस्थानेऽग्निसादः
हृन्नाशनश्चियमेवयेत्॥२२॥टीकाः कंठेरोधः कंठेरो धः
कफिनत्रिदोषः कंठस्थरोधः कफः कंठेऽपि पूर्वमुक्तस्तेन
कंठेरोधस्तथापुनर्ग्रहणं स्वतन्त्रिदोषबोधार्थं शिरस्तापो
मस्तकसंतापः नाभिपत्करः नाभिनाम स्थानंपाद्यौच
रणोक्तोहस्तोएतेत्रयोवाः शीतलाः हिमवंतः॥नखाः
करजाः आरिराजेमस्तगाश्चः॥तेषांशोभनाकृतत्वं॥
अभिहतरुग्दृष्टिवांचत्यंगभ्रांतिपरार्थज्ञानंअसमावि
षमवेगवतीनाडीअंगुष्ठमूलगतासिरास्त्रंचेत्तदा
मृतिः मरणमेवेतिज्ञेयं॥२२॥देहस्थानगतास्त्रिदोषाः ८
शीतमाह॥

वातादिदोष
स्थानकथनं

वातपित्तकफादेहेक्रमात्त्रिद्व्येकभागिनः॥तेषिनाभेरधश्चो
र्ध्वंहृदूर्ध्वंतेसमःसमाः॥२३॥टीकाः॥वातेति॥वातपित्तक
फाःदेहेशरीरेक्रमात्त्रिद्व्येकभागिनःत्रिभागोवातस्यद्वौ
भागौपित्तस्यकफस्यैकभागः॥तेषिवातादयस्त्रयोदोषाः
नाभेरधःनाभिस्थात्तदधोभागेस्थानंवायोःनाभिहृन्म८
ध्येपित्तस्यस्थानंहृदयोर्ध्वंकफस्थानं॥तैर्वातादिभिःस
मैस्वस्वभागेनस्वस्वस्थानस्थितैःसमाविकाररहितास्ते
वातादयोज्ञेयाः॥उक्तंचाष्टांगहृदयग्रंथेरोगस्तुदोष
वैषम्यंदोषसाम्यमरोगतेति॥२३॥चिकित्साया:परमावधिमाह॥श्लोकः॥प्राणःकंठाश्रितोयावद्रोगंतावदुपाचरे उपचार मर्यादा-
त्॥आयुःक्षयंकरोत्यन्यदृष्टारिष्टोपिजीवति॥२४॥०
टीकाः॥यावत्कालपर्यंतंकंठगतप्राणः प्राणवायुस्तावत्

कालपर्यंतं रोगंआमयंउपाचरेत्॥चिकित्सेत्॥कदाचित्स
मयविरोधेआयुःशेषंचेत्दृष्टरिष्टःमरणचिन्होपेतोपिजीव
ति॥२४॥श्लोक॥वातिकस्यश्मकचोरुक्षःश्यामव्यग्रःह्रस्वो वातप्रकृ
बलः॥पैत्तिकोप्यश्मःस्वेदीपाटलःपलितीसुधीः॥२५॥ तिचिकानी
टीका॥वातीति॥श्मश्रुकचस्तनुतरकेशःरुक्षःस्फुटितत्व पित्तप्रकृतिः
कृष्णोनीलवर्णः॥व्यग्रोस्वल्पचित्तःह्रस्वःपुष्टिहीनः॥अ
बलःसामर्थ्यहीनःसवातीवातविशिष्टप्रकृतिर्नरोज्ञेयः॥
अश्मःश्लक्ष्णःस्निग्धःस्वेदीघर्मशीलःपाटलःश्वेतरक्तवर्णःप८
क्षीणेकालेपलितकेशोपेतशुक्लवर्णयुतःसुधीःबुद्धिमान्स
पैत्तिकःपित्तप्रकृतिकः॥२५॥श्लोक॥कफीपांडुःस्थिरःधी कफप्रकृतिः
नोयुवाचिक्कणकचःसमः॥प्रायःस्वप्नेत्वभीक्ष्णंत्यारोहत्यंबु ९
रायाःक्रमात्॥२६॥टीका॥कफीति॥पांडुःश्वेतवर्णःस्थि

रोमंसःपीनपुष्टःयुवातरुणःअविरलबुद्धिहीनःस्निग्धकचःशोभ
नकेशःक्षमीक्षमाशीलःसकफोकफप्रकृतिवान्॥स्वप्नेनदी
तारिप्रकृतिवतानदीतीरेगमनं॥स्वप्नेस्वप्नावस्थायांआरोहा
त्यश्वारूढयान्॥आहैरोपर्वतवृक्षाद्यारोहणं॥अग्निप्रदीप्ता
नलः॥अंबुवाहयोजलवाहयःनदीतडागादिःतान्क्रमात्तई
क्षंतिपश्यति॥२६॥अथवयोभेदेनवातादिज्ञानं॥श्लोक॥ वयोभेदेन
विंशत्यब्दात्मन्निधेकद्वित्रिसंगुणाः॥१६।८।३२।६४ वातादिः
५०॰संयोगान्तेषुजन्मादेःकफपित्तानिलाःक्रमात्॥२७॥
टीका॥विंशेति॥विंशत्यब्दाःविगतविंशेभ्यस्तेविंशाःस्तोचतेअतिक्रांतयश्चविंशतिवर्ष
यः॥तेचतेअब्दाश्चएवमर्थः॥अब्दस्यविंशास्तृतीयां
शेमासचतुष्कंविगतंमासचतुष्कंयेभ्यस्तेअतिक्रांतयब्दाः

सप्तदशवर्षाणि एकंजातः एकंजातः षोडशवर्षाणिअष्टौ
मासस्त्रिधात्रिस्थानेस्थाप्याः॥प्रथमस्थाने एकगुणः षोड
१० शवर्षाणिअष्टौमासाः॥१६।८॥द्वितीयस्थानेद्विगुणस्त्रय
स्त्रिंशद्वर्षाणिचत्वारोमासाः॥३३।४॥तृतीयस्थानेत्रिगु
णिताःपंचाशद्वर्षाणि५०त्रयाणांसंयोगात्सप्तदशवर्षाणि
जन्मादेर्जननादारभ्यकफपित्तानिस्युर्ज्ञेयाः॥२७॥इतिव
योभेदेनवातादिज्ञानं॥ ॥अथसंक्रांतिवशाद्वातादिज्ञानमा ऋतुभेदेन
ह॥श्लोक॥कफः१पित्तंरमरुत्३पित्तं४श्लेष्म५वातोद्वि वातादिः॥
धाक्रमात्॥मीनार्कार्द्विद्विभेन्योत्थोवैरुलाःप्राङ्मुलाःस्व॰
जाः॥२८॥टीका॥मीनार्कान्मीनराशिस्थसूर्यात्द्विद्वि
भेद्वयोर्द्वयोःसंक्रात्योःकफःश्लेष्मापित्तंमरुत्वायुःपित्तं। १०
श्लेष्माकफः।वातोवायुःक्रमात्अनुक्रमेणज्ञेयाः॥अन्यो

थाःसंचितावैरुलाःप्रकुपिताःप्राङ्मुलाःउपशमंगताश्च।
स्वजावातपित्तकफाख्यारोषाज्ञातव्याइतिभावः॥२८॥॰॥
अथवातप्रकोपनहेतुमाह॥श्लोक॥कषायतिक्तकटुकैरूक्षशी वातप्रको
धानिलायनैः॥घुराभ्यांक्षतिश्रीतोभः॥श्लोक॥क्रोधाशनाश्र पहेतु-
नैः॥२९॥टीका॥कषायेति॥कषायतिक्तकटुकैः॥तुवरति
क्तकटुरसैः॥रूक्षशीधानिलायनैः॥रूक्षंनिस्नेहंशीधोवेगतं
भः॥अनिलायनंगवाश्वादितैश्चघुराभ्यांतेदिननिशियोजं
तेचरमेतृतीयांशे॥अतिश्रीतोभः॥शीततरमुदकं॥श्लोकक्रो
धाशनाशनैः॥श्लोकः॥पुत्रवित्तादेर्विरहः क्रोधोरोषःअश
नाशनेअध्यशनंचतैः॥२९॥श्लोक॥चिंताभिःस्वापभंगा
तिभाषणाद्यनुपानतः॥विषमाशनतोत्यर्थंमैथुनाद्वातको
पनं॥३०॥टीका॥चिंताभिस्वापभंगातिभाषणात्यंबुपानतः

चिंताविषयध्यानं भीमंस्वापभंगोनिद्रानाश:॥अतिभाषणात्
बहुभाषणात्॥अत्यंतुपानात्॥विषमाशनत:नियमहीनभोजनात्
अत्यर्थाबहुमार्गसेवनं॥अतिमैथुनंअसकृत्स्त्रीसंगमश्च ए८
भ्योहेतुभ्योनिद्राकोपनंवायुप्रकोपस्यात्॥३०॥अथपित्तप्रको पित्तप्रको
पहेतुमाह॥श्लोक॥तीक्ष्णाम्लकटुकक्षारलवणैरुष्णशीलात:॥ पहेतु:
उष्णदाहश्रमक्रोधैरत्यशनवर्जितै:॥३१॥टीका॥तीक्ष्णे
ति॥तीक्ष्णाम्लकटुकैक्षारै:तीक्ष्णंहिंग्वादि॥आम्लंचिंचादि॥
कटुकंकारवेल्लादि॥क्षारायवक्षारादय:॥लवणानिसामुद्रा
दीनि:॥उष्णशीलात:उष्णंवीर्यंयेषांशीलंस्वभावस्तेषां॥उष्ण
तस्मात्॥उष्णदाहश्रमक्रोधै:उष्णंचित्तकादिदाहोराजिका
दिश्रम:शरीरसामर्थ्यादतिरिक्तकर्मक्रोधोरोषनै:॥अत्य
शनभोजनेचयेभ्यश्चानवर्जनेउपवासेभ्यश्च॥एभ्योहेतु८
भ्योपित्तप्रकोपनंभवति॥३१॥अन्यच्च॥श्लोक॥घृतिरोधार्ध

योमद्यातिलतैलातिमैथुनात्॥विरहादुष्कृतस्नेहोन्मर्दनात्ति
कोपनं॥३२॥टीका॥घृतिरो:शिरास्थो:अर्धयो:मध्यान्नि८
शीथयो:॥मद्यात्सुरापानात्॥तिलतैलातिमैथुनात्॥तिलौ
लेतिलाद्भिजन्यस्नेह:॥अतिमैथुनंरात्र्यतिरिक्तस्त्रीसेवनंत८
स्मात्॥तैलोन्मर्दनात्तैलाभ्यंगात्॥पित्तप्रकोपनंपित्तप्रकोप
स्यात्॥३२॥अथकफप्रकोपहेतुमाह॥श्लोक॥दुग्धेक्षुलवण कफप्रको
शिग्रामत्स्यमांसाम्लपिछलै:॥गुरुभव्यान्नकैरभ्रातिस्वप्नात् पहेतु:
लनक्त:॥३३॥टीका॥दुग्धमिति॥दुग्धेक्षुलवणशिग्रामट
त्स्यमांसाम्लपिछलै:॥दुग्धंक्षीरंइक्षुस्तइक्षु:॥लवणंसामु
द्रादि॥शिग्राप्रसिद्धा॥मत्स्या:मीना:तेषांमांसंआमिषं॥अम्ल
तिंतिडीरसादि:॥पिछलंद्रवाद्यंतै:॥गुरुनव्यान्नकै:गुरु
र्मधादि:नव्यंनवीनमन्नंओदनादिकंउदकंचतै:॥दध्नादु

ग्धविकारेण।अतिस्वापात्बहुनिद्रासेवनात्॥नैत्यतक्रतः॥
नैत्यंतिलादिजस्नेहः॥तक्रंनवनीतहीनंमथितंतस्मात्॥३३
॥श्लोक॥शीतलाज्यनिशानीरपानोत्तिघृतभोजनैः॥बाल्ये
१२ स्निग्धैर्युरात्र्याद्येप्रायश्चकफकोपनं॥३४॥टीका॥शीतला
ज्यनिशानीरपानोत्तिघृतभोजनैः॥शीतत्वंत्रिरात्रंद्रव्यं
आज्यंघृतंनिशानीरपानंघृर्युषितोदकंप्रातरनं।अतिघृत
भोजनंबहुत्रिरात्रितिघृतभोजनंचतैः।बाल्येपूर्ववयसिस्निग्धैः
स्निग्धद्रव्यैःघुरात्र्याद्येरहिननिशायोः॥प्रथमेरोप्रायोब
हुधाकफकोपनंश्लेष्मप्रकोपस्यात्॥३४॥इतिवातपित्त।
कफप्रकोपनहेतुज्ञानं॥ ॥अथवातादिदोषत्रयप्रकोपलिं त्रिदोषप्र॰
गज्ञानमाह॥श्लोक॥रौक्ष्यंसंध्यस्थिरुक्कार्श्यंजृंभाकासो कोपलिंग
भ्रमोस्मृतिः॥तोदोग्निविषमोमूत्रेशावंरोधोनिलार्तितः॥३५ १२ पि

टीका॥रौक्ष्यंशुष्कता।संध्यस्थिरुक्संध्यस्थांपीडा।कार्श्यंरु
क्ता।जृंभाजृंभणं।कासःकासनं।भ्रमोभ्रमणं।अस्मृतिर्वि
स्मरणं।तोदोव्यथा।विषमोग्निर्विपरीतजठरानलः॥शावंमू
त्रंरुक्सवर्णमूत्रं।रोधोमलमूत्रस्तंभः।अतिवातिति:वातप्र
कोपाद्भवतीत्यर्थः॥३५॥अथपित्तप्रकोपलक्षणमाह॥० पित्तप्रको
दाहःकोपोभ्रमस्वेदोमलपाकःशिरोर्तिरट्॥पीतमूत्राद्यस्कूट पलक्षण
पीतंरीतेछापित्तकोपतः॥३६॥टीका॥दाहःसंतापःकोपः।
क्रोधःभ्रमश्चित्तास्वास्थ्यंस्वेदोघर्मःमलपाकःदोषपचनंशिरो
र्तिमस्तकशूलःरट्पिपासापीतंहरिद्रावर्णंमूत्रादिनखनेत्रा
दिकंअस्कूरनंपीतंपीतवर्णंरीतेछाशिरिरट्येछापित्तको
पतःपित्तप्रकोपात्॥स्यादित्यर्थः॥३६॥अथकफप्रकोपलिं कफलक्षणं
गज्ञानमाह॥श्लोक॥स्थैर्यंजाड्यंवमिःश्लेष्मारोत्यंवेपथुरा

वसः॥निद्रोस्रेकोसितंमूत्रंश्वासःकासःकफोसितः॥३७॥०
टीका॥स्थैर्यबुद्धिर्मांद्यंजाड्यंश्रमोजडताचमिद्धरिः॥श्लेष्माकफः॥
स्थैर्यंशीतभावः॥वेपथुःकंपः॥आलस्यःसामर्थ्येसत्यप्यनुत्साहः॥०
निद्रास्रावः॥उष्णेजाउत्सृज्यभक्षणादिवांछा॥सितंश्वेतवर्णंमूत्रं॥
श्वासःप्रसिध्यः॥कफोसितःकफप्रकोपाद्भवतीति॥३७॥श्लोक॥सर्वे
षांचात्रकोवायुःपित्तंपीतंहरित्कटुः॥क्वथमम्लमथोस्वादुर्दुग्धंश्वे
तःसितःकफः॥३८॥बालादिरोगत्रयाणांसाधारण्येनज्ञानमाह॥
टीका॥सर्वेषामिति॥सर्वेषांबालवृद्धादीनांपित्तकफादीनांचत्रयो
कःप्रेरकोवायुःपवनः॥पीतंहरिद्रावर्णंहरितंपत्रवत्श्यामवर्णंसदृश
वर्णंचाकटुकटुरसंक्वथंपाकतांप्राप्तं॥अम्लंअम्लरसंपित्तंअथो
नेत्ररसितश्वेतवर्णः॥स्वादुःस्वभावमधुरसःक्वथःपाकतांप्राप्तः॥
क्षारःक्षारोल्बणरसःकफःश्लेष्मातात्पर्यमित्यर्थः॥३८॥श्लोक
॥स्निग्धोष्णगुरुबल्याद्यैरानाभ्यंगांगमर्दनैः॥निद्रास्वेदनकद्वम्ल
बस्तिभिर्वातनाशनं॥३९॥टीका॥

स्निग्धमिति॥स्निग्धोष्णगुरुबल्याद्यैरानाभ्यंगांगमर्दनैः॥स्निग्धं वातनाशनोपचारः
चिक्कणं॥उष्णंभुक्त्यादि॥गुरुमाषादि॥बल्यंसामर्थ्यजनकं॥एतैरा
दिअनेभक्षणं॥अभ्यंगस्तैलादिना॥अंगमर्दनंगात्रघर्षणं॥मु
ष्टिकुट्टणंवातैः॥निद्रास्वेदनकद्वम्लबस्तिभिः॥निद्रायत्नंस्वे
दनंघर्मोत्सारकमाचरणं॥कुटमरिचादि॥अम्लंचिंचादि॥पूर्वोत्तर
बस्तिभिः॥पद्वम्लमितिपाठेपटुसामुद्रादिलवणं॥वातनाशनंना
युनाशस्यात्॥३९॥श्लोक॥स्वादुशीतंक्षुद्धेक्षुश्वेनास्यालिं पित्तनाशनोपचारः
गनानिलैः॥कषायतिक्तरेकादिभोजनैःपित्तनाशनं॥४०॥टीका
॥स्वादुमिति॥स्वादुमधुरं॥शीतंप्रसिद्धं॥दुग्धंपयः॥इक्षुद्रवः
श्वेनास्याकरा॥स्त्र्यालिंगनं॥तल्पांगसंगः॥अनिलैःव्यजनाद्यु
द्भवैः॥कषायतिक्तरेकादिभोजनैः॥कषायस्तुवरोरसः॥तिक्त
स्तोनिंबादिः॥रेकादिरेचनवमनाद्यं॥भोजनंभक्षणंचतैः॥पित्त
नाशनंपित्तप्रशमस्यात्॥४०॥श्लोक॥कषायतिक्तकटुके कफनाशनोपचारः

रुक्षैरेकारिनस्यतः॥व्यायामस्वेदनानिद्रामैथुनात्कफनाश
नं॥४१॥टीका॥कषायतिक्तकटुकैः कषायस्तुवरोरसः॥तिक्तः
कटुक्यादिः कटुकः शुंठ्यादिभिः॥रुक्षैः श्यामाकादिधान्या
दिभिस्तैः॥रेकादिनस्यतः॥रेकादिरेचनादिनस्यंनस्यकर्म
तस्मात्॥व्यायामस्वेदनिद्रामैथुनात्॥व्यायामः शरीरा
यासजनकंकर्मस्वेदनघर्मोत्पादकमाचरणं॥अनिद्राजाग
रः॥मैथुनंस्त्रीसंयोगतस्मात्कफनाशनंश्लेष्मोपशमस्या
त्॥४१॥इतिवातादिश्लेष्मोपशमनं॥अथषड्रसानांगुणा षड्रसगु
णागुणः
णाः॥श्लोक॥मधुरोबृंहणोबल्यः श्लेष्मामरुतपित्तजित्॥
गुरुस्निग्धोग्निहृत्स्थौल्यातिश्लेष्मार्बुदमेहकृत्॥४२॥
टीका॥मधुरः स्वादुः शर्करादिबृंहणः पुष्टिदः॥बल्यः बलं १४
कृत्॥श्लेष्मापित्तास्रपित्तरुक्कासःकफनंतत्कृत्तत्कारकः
॥४३॥अथलवणरसंगुणागुणानाह॥श्लोक॥लवणोवातं शारगुणः

पित्तंप्रसिद्धं एतानिजयति॥गुरुः पाकेजडः स्निग्धश्चिक्कणः अग्नि
हृत्जठरानलंमांद्यकर्तास्थौल्यादिश्लेष्मार्बुदमेहकृत्स्थौल्यं
मेदोरुट्॥अतिश्लेष्मावहुकफः अर्बुदंग्रंथिरोगविशेषः॥मेहंमूत्र
वर्णवेपरीत्याद्रोगप्रसिद्धः एतान्रोगान्करोतीत्यर्थः॥४२॥०
श्लोक॥अम्लोनुलोमनोरुच्यः श्रीणनः पाचनोग्निदः॥भ्रममरुत्कृ आम्लरस
पंडुहृद्रोगकफपित्तास्रकारकृत्॥४३॥टीका॥अम्लोरसः॥ गुणागुणः
निलुजारिजः॥अनुलोमनोवातंधोगतिकर्तारुच्यः रुचिकरः
श्रीणनः प्रसादकर्तापाचनः पाकहृत्॥अग्निदोजठरानलदृ
द्धिकृत्॥भ्रममरुद्भ्रमणंतद्रोगः॥पांडुः प्रसिद्धः॥एतत्पूर्व
एतंनाशकः॥रोगकफपित्तास्रकारकृत्॥रोगः रोथः॥क
फः श्लेष्मापित्तास्रपित्तरुक्कासः कफनंतत्कृत्तत्कारकः
॥४३॥अथलवणरसंगुणागुणानाह॥श्लोक॥लवणोवातं क्षारगुणः

जिद्वेदीपाचनोरोचनोग्निदः॥बल्यहृद्वेदनस्तंभवातास्रकुल्
जराकरः॥४४॥टीका॥त्रिवणक्षारस्तीक्ष्णोष्णः सैंधवादिः॥वातजित्
वायुःजेता॥भेदीबद्धमलादीनांभेदकः॥पाचनःपाककर्ता॥
रोचनोरुचिप्रदः॥अग्निदःअग्निवृद्धिकर्ता॥बल्यहृत्सामर्थ्यहर्
ता॥स्वेदनोघर्मप्रदः॥तस्मावातास्रकुल्कुजराकरः॥तस्मादि
पास्मावातास्रकुल्कुअग्निक्षास्रकुरोगः॥जराबार्धक्यकरः॥
तत्कर्मनिरोषः॥४४॥अथकषायरसगुणागुणानाह॥श्लोक तृतीयरस
॥कषायःशीतलोग्राहीरोपणःरोधकार्यकृत्॥हृद्रोधानह गुणाः५
दुष्टिःपीडनःकफपित्तजित्॥४५॥टीका॥कषायस्तुवरोरसः
स्तोभ्रादिः॥शीतलोहिमग्राहीग्टहण्यतिसारनुत्॥रोपणोव्र
णरुहत्॥रोधकार्यकृत्॥रोधःरोधःकार्यकरणात्तत्कृत्॥ १५
हृद्रोगाधानकृत्॥हृद्रोगस्तंभनान्नाम्नाप्रसिद्धः॥आध्मानमानाह

भेदःतत्कृत्॥रुक्षःरोपकृत्॥पीडनमुत्कंठःस्वजनकः॥कफ८
पित्तजित्॥श्लेष्मपित्तहंतास्यादितिरोषः॥४५॥अथकटुरस
गुणागुणानाह॥श्लोक॥कटुर्दीप्तोग्निरोरुच्यःरोथरुक्कृ कटुरसगुणाः
फजंतुजित्॥पुष्टिवीर्यहरोरुक्षःश्वयत्टूवातपित्तहृत्॥४६ नास्तिपित्ति
टीका॥कटुकटुरसःश्रृंग्यादिजः॥दीप्तादीपकः॥अग्निरोज
ठराग्नेस्कारकः॥रुच्यःरुचिजनकः॥रोथरुक्कफजंतुजित्
रोथरुक्रोफरोगः॥कफःश्लेष्माजंतवःकृमयः॥तज्जित
तज्जेता॥पुष्टिवीर्यहरः॥पुष्टिःस्थौल्यंवीर्यंबल्यंशुक्रंशरीर
सामर्थ्यंवा॥तत्क्षरोनाशकः॥रुक्षोनिस्नेहः॥श्वयत्टूवातपि८
त्तहृत्॥श्वयःप्रसिद्धः॥टूटूतस्य॥वातपित्तेप्रसिद्धे॥तत्क्षतत्
इंतास्यादित्यर्थः॥४६॥अथतिक्तरसगुणागुणानाहश्लो तिक्तकटु
क॥तिक्तस्त्टूकृमिवीर्यैषिज्वरहृत्क्षयवांतिकृत्॥स्वगुणगु रसगुणाः

णरायेनेत्यमादुत्पत्तिसेवनात्॥४७॥टीका॥तिक्तस्तिक्तोरसः।
निंबादिजः।तद्वत्कृमिवीर्यौषधज्वरहृत्॥तद्वत्पिपासा।कृमयःजं
तवः।वीर्यंशुक्रंओषोदाहःज्वरस्तापः।तेनाकारकः।क्षयवां
तिक्तत्॥क्षयोराजयक्ष्मा।वांतिर्वमनं।तत्कारकः।उक्तमर्थमु
पसंहरति॥एतेषूक्ताःषड्रसाःउत्पत्तिसेवनात्उत्पत्त्याद्व्
यांतरसंसर्गेणविनासेवनात्भक्षणात्क्रमात्उक्तक्रमात्
स्वगुणागुणदाः॥स्वकीयोगुणःस्वस्वीकरणंअगुणस्तद्वि
परीतंतत्कारकाःस्युःइतिनिश्चयेन॥४७॥इतिषड्रसगु
णागुणाः॥अथक्षीरगुणाः॥श्लोक॥अनूपःसरिदिक्षवा देशभेद गुणागुणाः १६
दिद्रुमाक्तःकफवातवान्॥जांगलःपित्तवान्व्यस्तोन्यो
न्यमिश्रोविमिश्रितः॥४८॥टीका॥अनूपइति॥सरिदिक्षवा
दिद्रुमाक्तः॥सरित्नदीरोधसःप्रसिद्धः।आदिशब्देनजंबु

चूतादयः।एतैःद्रुमैःअक्तःद्रुतः।कफवातवान्श्लेष्मवातकरः
अनूपःअनूपसंज्ञोदेशः॥व्यस्तः।एतद्विपरीतः।सरिदिक्षवादि
हितः।पित्तवान्पित्तकरित्यर्थः॥जांगलःजांगलसंज्ञोदेशः
॥अनूपोन्मिश्रःअनूपदेशेनउन्मिश्रैःअनूपजांगलसंकरवा *संमिश्रः
न्विमिश्रः॥अनूपजांगलदेशजनितगुणागुणवानित्यर्थः।
॥४८॥इतिदेशगुणागुणाः॥अथश्लोकत्रयेणजलस्यगुणा जलगुणाः
गुणानाह॥श्लोक॥दिव्यंकंसर्वदोषघ्नंसारसंमधुरंलघु॥नदीत
डागजंक्षारंवातलंचौद्भ्यमग्निकृत्॥४९॥टीका॥दिव्यंमेघादिजं
जलंसर्वदोषघ्नंत्रिदोषनाशकं॥सारसंसरोवरजंमधुरंस्वादुत्वघु
पाकेसुगमं॥नदीतडागजंनदीसरित्तडागःकृत्रिमोमहान्जला
शयः॥तत्संमधिजलंक्षारंयोग्यं॥वातलंवायुकृत्चौद्भ्यंसमीपो
त्पन्नपरदेशकुनदीतडकृतंअग्निकृत्जठराग्निकृत्॥४९॥श्लोक॥
पित्तलंदीपनंकौपंनैसर्गंश्लेष्महृल्लघु॥औद्भिदंपित्तहृत्सर्वंग्राम्येरे

षविवर्जितं॥५०॥टीका॥कौपंभूमिखातोत्थविस्तारः॥कूपःतज्जा
न्यंपित्तंपित्तरक्तं॥दाहनंजठरानलसंदीपनं॥नेत्ररौक्षतानु
गत्वद्वारिश्वासहोनिर्झरःतज्जन्यंश्लेष्महृत्॥कफनाशकरंपाकेल
घुः॥औद्भिदंभूमिमुद्भिद्यनिर्गतंजलंपित्तहृत्पित्तनाशकरंरो
षविवर्जितंदुर्गुणहीनंयत्सर्वजलंनामजांगलादित्रिप्रकारंराज
यक्ष्मापस्मारानुमित्यर्थः॥५०॥श्लोक॥वर्षासुनजलंग्राह्यंनाद्येयंच
हुरोषकृत्॥श्वित्रशीतंत्रिदोषघ्नंरोषकृत्सरहोषितं॥५१॥टीका॥
नाद्येयंनघाःनरस्यवानीरंनाद्येयंजलंबहुरोषकृत्अतिदुर्गुणकरं॥
नग्राह्यं॥वर्षासुवर्षर्तौकर्कसिंहसंक्रमेरवौसतिवर्षर्तुरित्यर्थः
नग्राह्यंगृहीतुमयोग्यमित्यर्थः॥श्वित्रशीतंपूर्वश्वित्रमन्वितंपश्चा
त्पूर्वोक्तंत्रिदोषघ्नंचाजंग्राहीश्वयारिजित्॥तत्संतत्तगुणंराजीरिका॥
चाद्यत्रिभागिके॥५१॥टीका॥मैषंमेषोद्भवंअश्मत्रिदोषघ्नंअश्म
अश्मरीअस्त्रइतिपाठेरक्तं॥त्रिदोषघ्नंवातादिदोषत्रयनाशकं॥
चपरंआजंजांगीपयः॥ग्राहीसंग्राहकंश्वयारिजित्ऊर्ध्वादिश्लेष्म॥
श्वासकासारयःतन्नाशकं॥तत्सामान्यंपयःराजीनिश्चिपरं

चेदितिं॥५१॥इतिजलवर्गः॥अथदुग्धवर्गः॥श्लोक॥गोक्षीरंजी
र्णतापास्रकृपित्तोषघ्नंरसायनं॥माहिषंवह्निहृच्छ्रोष्टुकृच्छ्विषोदर
रोगहृत्॥५२॥टीका॥श्लोकत्रयेणदुग्धस्यगुणागुणानाह॥
गोक्षीरमिति॥गोक्षीरंसुरभिदुग्धंजीर्णतापास्रकृपित्तोषघ्नं॥जीर्ण
तापःजीर्णज्वरःअस्रकृपित्तंओषोदाहःतन्नाशनंरसायनं
वल्यंपलितादिरोगघ्नं॥उक्तंच॥यज्जराव्याधिविध्वंसीभेषजंतद्रसा
यनमिति॥माहिषंमाहषीजंवह्निहृत्अग्निनाशकं॥चपरंओष्ट्रदु
ष्ट्रीजंतुकृविषोदररोगहृत्॥तुकृकुष्ठास्रोरोगाविशेषः॥विषंगर
लंउदरंप्लिहंरोगःरोफःतत्पूतन्नाशकं॥५२॥श्लोक॥मैष
मश्मत्रिदोषघ्नंचाजंग्राहीश्वयारिजित्॥तत्संतत्तगुणंराजीरिका
चाद्यत्रिभागिके॥५३॥टीका॥मैषंमेषोद्भवंअश्मत्रिदोषघ्नंअश्म
अश्मरीअस्त्रइतिपाठेरक्तं॥त्रिदोषघ्नंवातादिदोषत्रयनाशकं॥
चपरंआजंजांगीपयः॥ग्राहीसंग्राहकंश्वयारिजित्ऊर्ध्वादिश्लेष्म
श्वासकासारयःतन्नाशकं॥तत्सामान्यंपयःराजीनिश्चिपरं

दिवादिनेआद्यत्रिभागेकेप्रथमद्वितीयतृतीयप्रहरेचसंतप्तगुणंउ
ष्णफलदमितियावत्॥५३॥श्लोका॥आमंवातिश्लेष्मबल्यंदृष्यंपुष्टि
करंगुरुस्त्रीजंपित्तास्रदृग्रुग्घंधारोहणमामृतंपयः॥५४॥टीका
॥आमंअपक्वंदुग्धंवाविकल्येनअतिश्लेष्मबहुपक्वंघनमित्यर्थः॥ए
तद्दयमपिबल्यंसामर्थ्यकरं॥दृष्यधातुपुष्टिकरंदृढ्यंगुरुदीर्घ
पाकीच॥स्त्रीजंमनुष्यीदुग्धंपित्तास्रदृग्रुग्घं॥पित्तास्रंरक्तपित्तं
दृग्रुग्दृष्टिरोगः तन्नाशकरं॥धारोहणंदोहनकालेयत्आगतंपा
त्रेदुग्धंसद्योधाराजन्येनद्वारोहणमित्यर्थः॥तेदुग्धंअमृतंसुधातु
ल्येइत्यनेनअमृतेयेगुणास्तएवगुणादुग्धेस्युरितिभावः॥५४॥
अथश्लोकद्वयेनदधितन्मस्तुचतयोर्गुणागुणानाह॥श्लोका॥ दधिगुणः
दधिबल्यंवरंपित्तश्लेष्मघ्नंग्राह्यंथाम्लकं॥त्रिजन्मेदजातंत
न्मस्तुस्रोतोविशोधनं॥५५॥टीका॥दधिस्वाद्म्लेनातिमधुरं

१८

नाप्यत्यम्लमितियावत्॥तद्दधिबल्यंबल्यकरंवरंउत्तमं॥अथतं
तरंअम्लकंअत्यम्लमित्यर्थः पित्तश्लेष्मघ्नंपित्तकफकारीमेदजा
तेअतिमधुरमितियावत्त्रिजन्मत्रिदोषकरं॥तन्मस्तुदधिसंता
निकावातदुरकंस्रोतोविशोधनंस्रोतःशुद्धिकारकं॥५५॥श्लो
क॥शरत्ग्रीष्मवसंतेषुनिंद्युस्तंदधिदोषकृत्॥हेमंतेशिशि
रेवर्षाकालेतच्चबल्यप्रदं॥५६॥टीका॥शरत्ग्रीष्मवसंतेषुएते
षुऋतुत्रयेषुकन्यातुलाभयराशिगेरवौवारहतुः॥हृषभमिथु
नराशिगेरवौग्रीष्मर्तुः मीनमेषसंक्रमगेरवौवसंतर्तुःइत्यर्थः॥
निशिरात्रौसर्वदासर्वकालेइत्यर्थःहेमंतसमाधिदोषकृद्गुण
प्रदं॥हेमंतेऋतौरश्विकधनुर्गतेसूर्येशिशिरेमकरकुंभगेरवौ॥
वर्षाकालेकर्कसिंहगेरवौभवितंतच्चपूर्वोक्तंदधिबल्यप्रदंसाम
र्थ्यकृद्भवेत्॥५६॥इतिदधिवर्गः॥अथश्लोकद्वयेनतक्रगुणान् तक्रगुणः

णानाह॥श्लोक॥तक्रंगव्यंत्रिदोषघ्नंमाहिषंकफकृत्तथा
॥पांडुकुष्ठग्रहारुमारश्वित्रारुच्यतिसारहृत्॥५७॥टीका॥
गव्यंगोजन्यंतक्रंत्रिदोषघ्नंदोषत्रयनाशकं॥माहिष्यंमहिषी
१९ समुत्पन्नंकफकृत्कफकृच्छ्लेष्मकृत्तथाकारी॥सामान्यतक्रगुणा
नूक्त्वा॥पांडुकुष्ठग्रहारुमारश्वित्रारुच्यतिसारहृत्॥पांडुः
पांडुरोगः॥कुष्ठंमूत्रकुष्ठंग्रहोग्रहणी॥अरुर्मूत्राशयरुक्॥
अरोगिदेहत्वंव्याधिरूपःश्लीपदंउदरपीडाअरुचिःअरोच
कं॥अतिसारःप्रसिद्धः॥तत्हृत्तच्चाशकं॥५७॥श्लोक॥
वाताद्यैर्धिसिताव्योषैरम्लंस्वादुकषायकं॥तक्रमर्धांबुसि
द्धंयत्तत्तोर्धांबुमामवातनुत्॥५८॥टीका॥वाताद्यैर्वातादिदो
षत्रयपित्तकफैरित्यर्थः॥अधिसिताव्योषैःअधिसैंधवसिता १९
शर्करान्योषंत्रिकटुकैतैःअम्लंअम्लरसंस्वादुमधुरंकषायंतु

वरंअयमर्थः॥वातेसैंधवेनसहाम्लंतक्रं॥पित्तेशर्करयामधुरं॥क
फेत्रिकटुनातुवरंतक्रंपेयमित्यर्थः॥अर्धांबुसिद्धंदध्नोर्धोदकमि
श्रंयत्तद्दधितक्रं॥ततःपूर्वार्धात्अर्धांबुपादोदकमितियावद्यत्तक्रं॥
आमवातहृत्आमवायुहारि॥इतितक्रवर्गः॥अथश्लोकद्वयेन नवनीतगु
नवनीतघृतगुणानाहश्लोक॥सद्योगोमहिषीजातंनवनीतं णाः घृत
त्रिदोषजित्॥घृतंगव्यंत्रिदोषघ्नंमाहिषंपित्तकृत्॥५९॥टी
का॥गोमहिषीजातंधेनुमहिषीसमुत्पन्नंसद्यस्तत्कालएवनव
नंत्रिदोषजित्दोषत्रयहारि॥गव्यंसुरभिजंघृतंसार्धंत्रिदो
षघ्नंवाताद्दोषत्रयापहं॥माहिषंमहिषीजंघृतंपित्तकृत्॥
पित्तकारीगुरुपाकेजडं॥५९॥श्लोक॥स्वस्वक्षीरगुणंमेषी
छागीजंत्वविलंघृतं॥जीर्णमुग्रमपस्मारग्रहोन्मादव्रणापह
जित्॥६०॥टीका॥मेषीछागीजंअजाविसंभूतंघृतंस्वस्वक्षी
रगुणंस्वीयस्वीयदुग्धवद्गुणकारकं॥अविजंसंपूर्णंयावत्

घृतमान्नंउग्रंउत्कटदुर्गंधीमान्नंजीर्णपुराणंवर्षोर्ध्वमितियाव
त्।।घृतंसर्पिःअपस्मारग्रहोन्मादव्रणादिजित्।।अपस्मारोरो
गविशेषःग्रहोभूतावेशःउन्मादस्तदभिधानोरोगःव्रणोक्त
२० ताल्जिःआदिशब्देनविसर्पादियस्तज्जित्तंनाशकरमि
५घृत त्यर्थः।।६०।।इतिनवनीतवर्गः।। ।।अथश्लोकद्वयेनतैलगु तैलवर्गः
णानाह।।श्लोक।।तैलमेरंडजंकोष्ठंमेदोवातकफापहं।
सार्षपंव्रणकुष्ठार्शःशुक्रवातकफापहं।।६१।।टीका।।एरंडजं
कटुबीजसंभवंतैलंस्निग्धंकोष्ठंकिंचिदुष्णवीर्यंमेदोवातकफा
हं।।मेदोमेदस्वृद्धिःवातःआमवाताद्यधिःकफःश्लेष्मारेत
पहंतन्नाशकृत्।।सार्षपंसर्षपसंभवंव्रणकुष्ठार्शःशुक्रवात
कफापहं।।व्रणोग्रंथिःकुष्ठंत्वक्रोगःअर्शोमूलव्याधिःशुक्र २०
रेतःवातकफोग्रसिध्नोनरपहंतन्नाशकं।।६१।।श्लोक।।कौं

कारंजंव्रणवातघ्नंकोसुंभंकफपित्तकृत्।।कार्पासंगुरुरोगघ्नं
त्रिजंरक्तपित्तकृत्।।६२।।टीका।।कारंजंकरंजबीजादुत्पन्नंउग्ररो
गघ्नंअर्शोरोगनाशकं।।तिलजंतिलोद्भूतंतैलंरक्तपित्तकृद्दाह
पित्तकारी।।६२।।इतितैलवर्गः।। ।।अथैकेनश्लोकेनेक्षुरार्करा इक्षुवर्गः
गुणानाह।।श्लोक।।सीतेक्षुर्बृंहणोवृष्यःश्लेष्मकृत्शीतलोसितः
।।तद्वत्सोयंत्रजोग्राहीरेचुश्चेक्षुगुणासिता।।६३।।टीका।।सीते
क्षुःश्वेतवर्णेक्षुःबृंहणःवोष्टिकःवृष्योबृंहवीर्यकृत्।।असितः
कृष्णेक्षुःश्लेष्मकृत्कफकारीशीतलःशीतवीर्यः।।यंत्रजोयंत्र
निर्मुक्तःतद्वत्सःसामान्येक्षुरसःग्राहीग्राहकःगुरुर्जडःसिता
१५ शर्करा।।इक्षुगुणापूर्वोक्तेषुगुणदा।।६३इतिइक्षुशर्करावर्गः।।
अथैकेनश्लोकेनगुडमधुगुणागुणानाह।।श्लोक।।गुडोजीर्ण गुडमधु
स्निग्धोनवोपिश्रमहृद्गुरुः।।मधुस्निग्धहृद्श्वासाहिकाछ गुणाः-
र्दिविषापहः।।६४।।टीका।।जीर्णःप्राचीनगुडइक्षुविकारःस्नि

दोषघ्नोदोषत्रयहृत्।।नवोपिन्ननोपिश्रमहृत्मार्गक्रमणदुःख
हा।।गुरुर्जडः।।मधुस्तौद्रंत्रिदोषजित्।।सन्निपातघ्नं।।श्वासहिक्का
छर्विषापहं।।श्वासःश्वसनं।।हिक्काहिक्कनं।।छर्दिःवांतिः।।विषंगर
२१ लंतद्पहन्नाराकं।।६४।।इतिगुडमधुवर्गः।।अथश्लोकयुग्मेनमद्य मद्यगुणः
मूत्रगुणागुणानाह।।श्लोक।।मद्यंदोषीमरुच्छ्लेष्मश्रमघ्नंमदरीप
नं।।मूत्रंस्वरगजाश्वानांमेदोपस्मारकुष्ठजित्।।६५।।टीका।।मद्यं
सुरा।।दोषीदोषकरं।।मरुच्छ्लेष्मघ्नं।।वातकफहारी।।श्रमघ्नंश्रमहरी
।।मदरीपनंमारकं।।स्वरजाश्वानांगर्धभकुंजरतुरंगाणांमूत्रंअसि
द्धं।।मेदोपस्मारकुष्ठजित्।।मेदोमेदोवृद्धिः।।अपस्मारस्तदाख्योरो
गः।।कुष्ठत्वग्रोगस्तज्जित्।।तनूहारी।।६५।।श्लोक।।गव्याजौष्ट्रम
रुत्पांडुश्वासकासकफारिजित्।।माहिषंवातश्लेथश्लेथघ्नंतज्ज २१
२ ग्वि विषापहं।।६६।।टीका।।गव्याजौष्ट्रगव्यंगोमूत्रंआजमाविजं
औष्ट्रमुष्ट्रीभवंमूत्रं।।मरुत्पांडुश्वासकासकफारिजित्।।मरुद्वा

युः।।पांडुःप्रसिद्धः।।श्वासःश्वसनं।।कासःकसनं।।कफःश्लेष्मा।।आ
दिनोदरादिस्तज्जित्।।हरकं।।माहिषंमहिषीजंमूत्रं।।वातश्लेथघ्नं
वायुश्लेष्महारी।।अजंमनुष्योत्थंदकुरुविषापहंनेत्ररोगगरव्रणापह
हारी।।६६।।इतिमद्यमूत्रवर्गः।।अथभुंड्यादिगुणागुणानाह।।श्लोक भुंडीगुणः
।।शुंठीविबंधग्रहणीश्वासामवातनुत्।।मरीचंपित्तलंतीक्ष्णंदृह मरिचगुणः
णीकफवातहृत्।।६७।।टीका।।शुंठीप्रसिद्धः।।विबंधग्रहणीश्वा
सामवातनुत्।।विबंरोमत्यग्रहः।।ग्रहणीसंग्रहणी।।श्वासमुदरपीडा।
श्वासःश्वसनंआमवातोआमवायुः।।तन्नुत्तन्नारानी।।मरिचंप्रसिद्धं।
पित्तलंपित्तकारी।।तीक्ष्णंमाग्नेयं।।ग्रहणीकफवातहृत्।।संग्रहीणीश्लेष्म
वायुहारी।।६७।।श्लोक।।पिप्पलीमधुनाछर्दिश्वासकासज्वरापहृत् पिप्पलीगु·
ण।।व्योषंवासमधुंकुकासश्वासवातकफापहं।।६८।।टीका।।मधुनाक्षौ व्योषगुणः
द्रेणसहापिप्पलीकणा।।छर्दिकासश्वासज्वरापहृत्।।छर्दिर्वांतिः।।
श्वासःश्वसनं।।कासःकसनं।।ज्वरस्तापः।।आरिनाक्षयाधात्रीहृत्।।

ततहारी।ओषत्रिकटकंस्वतंत्रवासधुयुक्तोरुयुक्तंकासश्वासवात
कफापहं।कासःकेसनं।श्वासःश्वसनं।वातोवायुः।कफःश्लेष्मात
दपहंततहृत्।।८।।श्लोक।।हिंगुश्रृंग्यविबंधघ्नमामवातकफापः हिंगुयवा
हं।।यवानीदीपनीश्रृंग्याजीर्णवातकफापहा।।९।।टीका।।हिंगुरा नीगुणाः
२२ मठं।श्रृंग्यविबंधघ्नं।श्रृंग्यमुररुकुविबंधोमलग्रहः।ततघ्नंतत
हृत्।आमवातकफापहं।आमवातआमवायुः।कफश्लेष्मातदप
हंतन्नाशी।।यवानीदीप्यः।श्रृंग्याजीर्णवातकफापहं।।श्रृंग्यमुर
रुकुअजीर्णंत्रासिद्धं।वातोवायुः।कफश्लेष्मा।तदापहातद्धृत्
।।१०।।श्लोक।।धान्याजाज्यरुचिछर्ज्वरतृष्णमदाहहृत्।। धणेजिरेचि
त्वकुरुघ्नोग्निसमःस्निग्धोनिःविषास्कुत्वग्निहा।।७०।।धान्याट नीगुणाः
जाज्यरुचिछर्ज्वरतृष्णमदाहहृत्।।धान्यंधना।अजाजीजीरकं
चा।अरुचिरोचकं।छर्दिर्वांतिः।ज्वरस्तापः।तद्धृतषा।श्रमजा। २२

यासः।दाहसंतापः।ततहृत्तन्नाशकारिणी।।चित्रः।चित्रकः।।
त्वग्रुघ्नश्चमरीगहृत्।।अग्निसमोनत्वसदृशः।।निदग्निशाहृद्दि
त्यर्थः।विषास्रग्त्वग्गतिहागरत्वरुचर्मरोगहारिणी।।७०।।श्लोक शोफगु
।।शताह्वायोनिश्रृंग्यघ्नोदाहतृष्णाशिरोगनुत्।।पुरोव्रणमरुच्यो गुणाः
फजिद्ग्राहीपुष्टिवीर्यकृत्।।७१।।टीका।।शताह्वाशतपुष्पाबीजंयो
निश्रृंग्यघ्नीगर्भार्तिनाशिनी।।दाहतृष्णाशिरोगनुत्।।दाहः संतापः
तृष्णातृषा।शिरोगोनेत्ररोगस्तंनाशिनी।।पुरोगुग्गुलुः।।व्रणमरु
च्योफजित्।।व्रणोग्रंथिः।मरुद्वायुः।शोफः।शोथस्तज्जेता।।ग्राही।
ग्राहकः।पुष्टिवीर्यकृत्।।पुष्टिंहृणंवीर्यंशुक्रंतत्कारी।।७१।।०
श्लोक।।पथ्याक्षीदात्रिफापीतास्तंभपाकविरेकदा।।क्रमात्तगुडो हर्तकी
त्साद्रिस्तस्तोमानेवसानदा।।७२।।टीका।।पथ्याहरीतकी।क्रमात् गुणाः
क्रमेणातत्तद्गुडोत्साद्रिःसहाक्षीदाअक्षिनाफलाचसतीस्तंभ

पाकरेकदाभवतिअयमर्थः।।तत्रैणसहस्त्रीदाकल्कीकृत्यभक्षितासती।
स्तंभदाग्राहिणीभवती।।तथाशुंठेनसहपिंडीकृत्यभक्षितासतिपाकरा
पाचनीभवती।।तथाचउत्पाट्यिकुशोदकैःसहपीताचूर्णीकृत्यभक्षि।
तासतीविरेकदारेचनीभवती।।तत्रैस्माद्धेतोःसापथ्यासदाषट्रस
तुषपिप्पलेवजननीवसुखदेत्यर्थः।।७२।।श्लोका।।आरंहगतिका बेहडेआं
सघ्नेकेश्यपित्तकफव्रणघ्न।।फलंधात्र्यास्त्रिदोषघ्नंदृष्यंत्वग्दाहमेह वर्णगुणाः
हृत्।।७३।।टीका।।आरंकर्षफलंहगतिकासघ्न।।हगतिनेत्रपीड
कासकल्मनंतन्नाशनं।।केश्यंकेशवर्धनं।।पित्तकफव्रणघ्न।।पित्त
श्लेष्मापहं।।धात्र्याःआमलक्याफलंत्रिदोषघ्नंदोषत्रयनाशकं।।
दृष्यंपुष्टिदं।।त्वग्दाहमेहहृत्।।त्वग्दाहःत्वचिसंतापः।।मेहोमूत्रवि
कारः।।तन्नाशनं।।७३।।श्लोका।।त्रिफलामेहरोगाम्लकुज्वरदृगुकुष्ठ २३
हारितिजित्।।मधुसर्पिःसिताक्षाख्यावल्लीपित्तदोषहृत्।।७४।।

त्रिफलागु
णानाह-

टीका।।त्रिफलाप्रसिद्धा।।मेहरोगाम्लकुज्वरदृगुकुष्ठहारितिजित्।।मे
होमूत्रविकारः।।रोगाः।रोथः।।अम्लज्वरोरक्तगतस्तापः।।दृगुकुनेत्र
पीडाग्रहःसंग्रहिणी।।भारिष्टेतंत्रान्तरिनी।।अक्षाख्यात्रिफला।।म
धुसर्पिःसिताक्षा।।एतेद्वेतुल्यसर्करायुक्तावल्लीपित्तदोषहृत्।।व
ल्लीत्वग्रोथत्र्यंपित्तंकेशरोकत्र्यंदोषाःवातपित्तकफास्तन्ना
शिनी।।७४।।श्लोका।।त्वक्पत्रैलेभयुक्तच्यंछर्द्विज्वरविषादिहृ त्रिसुगंध
त्।।रोचकंरुचिकृद्वह्निदोषघ्नंसैंधवं।।७५।।टीका।।त्वक्पत्रै सचछसैंध
त्रैलेभयुक्।।त्वक्वरांगं।।पत्रंतमालपत्रं।।एलाद्वयं।।इभंनागके वर्णाः।।
सरंयुक्तयुक्तं।।मिलितंचानुजानामित्यर्थः।।कृच्यंरुचिकारी।।छ
र्द्विज्वरविषादिहृत्।।वांतितापगरत्वादिनाशकं।।रोचकंरुचकं।।
लवणं।।रुचिकृत्रुचिकारी।।भेदीमत्तभेदकं।।सैंधवंसिंधुलवणं
त्रिदोषघ्नंदोषत्रयनाशी।।७५।।यवक्षारोऽमरीकुष्ठगुल्महृद्व मवक्षारः
स्तिरोधनः।।कफपित्तहरं पूगमेलाप्यरुचिवांतिहृत्।।७६।। सुपारिद
त्वचिगुणाः

टीका॥यवक्षारश्चिरुः॥अश्मरीकफघ्नत्वात्॥अश्मरीमूत्रा
श्मरीकफघ्नमूत्रकृच्छ्रघ्नत्वात्मूत्रग्रंथिस्तंभनाशकः॥वस्तिरोग
धनोमूत्रनाशयशुद्धिकृत्॥पूगंपूगीफलंकफपित्तहरंश्लेष्मपि
त्तहृत्॥एलातरिरपिअरुचिवांतिहृत्अरोचकवमनापहं॥७६
॥श्लोक॥त्वंगंश्रमपित्तघ्नंकर्पूरोदाहमेहहृत्॥तांबूलंकफवात त्वंगकर्पू
घ्नंसुभगंकामकांतिदं॥७७॥टीका॥त्वंगंरेवकुसुमं॥श्रमपि रतांबूलगु·
त्तघ्नं॥आयासदुःखपित्तनाशी॥कर्पूरःकदलीकंदसमुत्पन्नोगंध
द्रव्यविशेषः॥दाहमेहहृत्संतापमूत्रविकारहंता॥तांबूलंनाग
वल्लीपत्रपूगचूर्णखादिरादिसंमिश्रंद्रव्यंकफवातघ्नंश्लेष्मवायुना
शनंसुभगंसौभाग्यंकामकांतिदंमदनशरीरतेजकरं॥७७॥श्लो तांबूवर्जः
कोगतत्यजेद्यत्नतःपित्तास्रकृद्दृर्जीविषप्रदं॥नित्याभ्यंगःश्र २४
वोक्षित्वकूरुग्जरश्रमवातहृत्॥७८॥टीका॥तत्तांबूलंपित्तास्रकृ

२४

दृद्मूर्छाविषप्रदं॥पित्तास्रकूरकृपित्तंदृद्दृष्टिकृन्मूर्छामोहः॥
विषंगरत्वंशमंव्रणतस्मिन्नायत्नतःप्रयत्नेनत्यजेत्वर्जयेत्॥नित्या
भ्यंगःनित्यंनिरंतरंअभ्यंगस्तैलक्षेपः॥श्रवोक्षित्वकूरुग्जरश्रमवात
हृत्॥श्रवःकर्णकृत्॥अक्षिनेत्रकृत्वकृत्वग्योगः॥जरावार्धक्यंश्रम
आयासः॥वातवायुः॥तत्तहृत्तद्रपहा॥७८॥इतिभुंक्ष्यादिवर्गः॥०॥०
॥अथैकादशश्लोकैःफलकंदगुणागुणानाह॥श्लोक॥त्रिरघ्नदाडिमंचाट फलवर्गः
म्लोवातलःकफघ्नकृत्॥विष्टंभीतद्वत्बीजपूरंवातकफापहं॥७९॥ तस्यगुणाः
दाडिमस्य
टीका॥दाडिमंदाडिमीफलं॥त्रिरुघ्नरोषत्रयनाशकं॥अम्लोरसतः
॥वातघ्नोवातकृत्॥कफघ्नकृत्॥श्लेष्मवीर्यकारी॥तद्वत्तत्फलर
सःविष्टंभीविबंधकृत्॥बीजपूरंमातुलिंगं॥वातकफापहंवायुश्लेष्म
हृत्॥७९॥श्लोक॥जंबीरनिंबुकंतीव्रंपित्तघ्निनिडीफलं॥रेचघ्नंच निंबूचिंचा
रंस्वादुनारंगंमातुलिपित्तकृत्॥८०॥टीका॥जंबीरंमधुरनिंबुफलं॥निंबु नारिंगगुणः
कंनिंबुफलं॥तीव्रमुग्रंपित्तकृत्पित्तकारी॥निडीफलंचिंचाफलं॥रे
चकृत्रेचकारी॥तत्रस्वादुमधुरंनिडीफलंवरंश्रेष्ठं॥नारिंगंनारिंगफ

लं॰अतिपित्तहृत्॥बृहत्पित्तकारी॥८०॥श्लोक॥पनसंनारिकेरंचसुप
क्वंबदरीफलंगुरुस्निग्धंग्राहिगुरुनमं॥८१॥टीका॥
पनसमिति॥सुपक्वंसुष्ठुरसपक्वं॥पनसंकंटकीफलंमज्जा॥नारीकेरं
नारिकेलफलं॥बदरीफलंकर्कंधुफलंच॥गुरुमांसहृद्यंपित्तव
हृत्॥स्वादुमधुरं॥स्निग्धंमृदु॥ग्राहीग्राहकं॥गुरुगुजउद्व्ये
गुउन्नमंश्लेष्मातिजडमित्यर्थः॥८१॥जंबूबंकफपित्तघ्नंरुच्यंविष्टंभि
वातलंगुरवर्जूरोरक्तपित्तघ्नःसिरोत्तंसर्वरोगहृत्॥८२॥टीका॥जं॰
बूबंजंबूफलंगुरुकफपित्तघ्नंश्लेष्मापित्तहृत्॥रुच्यंरुचिकरं॥विष्टंभी॰
ग्राहकं॥वातलंवायुकरं॥खर्जूरीखर्जुरीफलंगुरुरक्तपित्तघ्नोरक्तपि
त्तहृत्॥सिरोत्तंसिरीफलंसर्वरोगहृत्॥रोगमात्रंनाशकं॥८२॥
श्लोक॥अश्वत्थोडुंबरंदाहस्रग्पित्तघ्नंसुशीतलं॥प्रियालंग्राहिवृ
ष्यंचास्रिग्भंतद्वृहारिवातलं॥८३॥टीका॥अश्वत्थोडुंबरंअश्वत्थंपि
प्पलफलं॥औडुंबरमुडुंबरफलंच॥दाहस्रक्पित्तघ्नंदाहःसंतापःअसृक्

उडुंबरादिः २५

स्त्रपित्तघ्नंबल्यंकूष्मांडकेसरं॥८७॥टीका॥घनंपद्मकंकेसरंवल्लि॰
विरोषफलंमुस्तोहरितकंरविरोषोवा॥कालिंगंकलिंगफलंमतुंब
कंतुंबीफलंचाकफवातकृत्बल्यासवायुकारी॥कूष्मांडंकूष्मांडी॰
फलंसर्वदोषास्त्रपित्तघ्नं॥दोषत्रयस्तुपित्तहृत्॥८७॥श्लोका॥ २५
बालंककोटिवार्ताकंपटोलंकारवेल्लकं॥कुष्मेहज्वरश्वासकासाजी
र्णकफापहं॥८७॥टीका॥बालंकोमलं॥ककोटिंवनकारवल्लीफलं
वार्ताकंवृंताकीफलं॥पटोलंपटोलीफलं॥कारवेल्लकंग्राम्यकारव
ल्लीफलं॥कुष्मेहज्वरश्वासकासाजीर्णकफापहं॥कुष्मत्रयंदोषः॥
मेहंमूत्ररोगः॥ज्वरस्तापः॥श्वासःश्वसनं॥कासःकसनं॥अजीर्ण
विषूचिकादि॥कफोबल्यासस्तदपहंतन्नाशकं॥८७॥श्लोका॥राज
जंबोस्रातकीबिंबीफलमत्युग्रपित्तहृत्॥स्मरणोर्कफध्वंसीपो॰
थंघ्रिवातत्रेणुरूः॥८८॥टीका॥राजंबोस्रातकीबिंबीफलं॥राज २५
बोधातकीघोषा॥ग्राम्याबोस्रातकीवा॥बिंबीबुद्धिनाशिनी॥तयोः

कफापहं॥मेथिकाग्राहिणीरुष्यत्रानाक्षवातुलाजजा॥९१॥टीका॥
मरुवकंश्लेष्महृद्वातकोपनंतंश्लेष्मकंदीपश्चेतंश्लेष्मकंदोषहृद्वा८
तारिजीत्॥घनंतरेवजठरंवातकफापहं॥वयुबलासजित्॥मेथिकामेथि
२७ पत्राणिग्राहिणीविबंधहृत्॥रुष्यपुष्टिरुच्च॥त्रानाक्षामिश्रिपत्रं॥वा
तलाघयुरुजलघुवी॥अस्याःपुनस्तेरवनंपत्रत्रारवसंग्रहार्थं॥९१॥श्लो
क॥चिल्लीवास्तूकरुघ्राःसंग्राहीगुरुवातुलाः॥काचमाचीत्रिदोष८
घ्नीचांगेरीकफवातहृत्॥९२॥चिल्लीवास्तूकंरुघ्राः॥चिल्लीघोट्टी
वास्तूकःश्वाकवतः॥काचमाचीकांगोणी॥त्रिदोषघ्नीदोषत्रयहृत्॥
चांगेरीचुक्रिकाकफवातहृत्॥वलासवायुजित्॥९२॥श्लोक॥
वातलादीपनीपंजीभागंनाडीकचुंचुकौ॥सधुरेकफपित्तघ्नेकौ
सुभंसर्वदोषहृत्॥९३॥टीका॥पंजीपांजभागंभारंगीच॥वा
तलावयुरा॥दीपनीअग्निदीपिकारी॥नाडीकचुंचुकोनाडिकः॥ २७
रक्तत्रारविशेषचुक्रःचुक्रश्चेतौ॥मधुरेस्वादुकफपित्तघ्नौवलासपि

नन्नाशनौ॥कुसुंभकंदीपनंसर्वदोषहृत्दोषत्रयकारी॥९३॥श्लो
क॥वर्षाभूवल्लिरोथघ्नासिद्धार्थःकफवातहृत्॥कृमिकासकफध्वंसी
दीपनःकासमर्दकः॥९४॥टीका॥वर्षाभूःसुवेश्वेतारक्ताचवातरो
थघ्नीवायुरोगहारी॥सिद्धार्थःशिरसःकफवातहृत्॥वलासवा८
युजित्॥कासमर्दकःकावेसेरा॥कृमिकासकफध्वंसी॥कृमयःकी
टाःकासःकफनंकफोवलासस्तध्वंसीनाशकृत्॥दीपनोग्निकृ
त्॥९४॥श्लोक॥राजिकापित्तलापित्तविषहृत्तुंडुलीयकः॥विष्टं
भीमरुन्मासःस्तोकोवातग्निकृच्च॥९५॥टीका॥राजिकामो
हरी॥पित्तलापित्तहरा॥तंडुलीयकःतंडुलजापित्तविषहृत्॥पित्त
मरुत्जित्॥मासःविष्टंभीमलरोथकृत्॥मरुकृत्कंदर्पकृत्॥स्तो
कःकृसमाषःश्वेतमाषःचवल्यावातग्निकृत्॥वायुवह्निकारी॥ल
२ घुर्गुरुः॥९५॥श्लोक॥रक्तशालिर्महाशालिःकलमश्चेतिशाल८ धान्यवर्गः
यः॥पुष्टिवीर्यबलारोग्यकारिणोमधुरामताः॥९६॥टीका॥रक्त

२इतिमूलपत्रवर्गः॥

शालिरिति॥शोणवर्णव्रीहिः।महाशालिः।हृद्व्रीहिः।कमलशालिः त्र
त्रयव्रीहीश्च॥इतिपूर्वोक्तास्त्रयः॥शालयोः व्रीहिविशेषः।पुष्टिवी
र्यबलारोग्यकारिणः॥हृद्दृणशुक्रसामर्थ्यनिरोगताजनकाः।मधु
२८ राः।स्वादुरसाः।मताः।मान्याः॥९४॥श्लोक॥षष्टिकः।सर्वदोषघ्नः८
श्यामश्लक्ष्णवातलः॥कंगुकोद्रवनीवाराः।कफपित्तहराः।मताः॥९७
॥टीका॥षष्टिकोगर्भस्थएवषष्टिरात्रेणपाकंयातिसषष्टिकः॥स
र्वदोषघ्नोदोषत्रयहृत्॥श्यामलः।लक्ष्णशालिर्वाशामकाः॥श्लक्ष्णवात
लः॥निस्नेहोवायुप्रश्च॥कंगुकोद्रवनीवाराः॥कंगुः।लालरक्तपीत
भेदेनत्रिवंगुः॥कोद्रवः।कोरद्रवः॥नीवारस्तृणधान्यंचानेकफपि८
त्तहराः॥बलासपित्तनाशनाः॥९७॥श्लोक॥गोधूमोमारुतध्वं
सीकफपित्तहरोयवः॥मुद्गोहंतिकफंपित्तंमाषोगुर्वनिलापहः
॥९८॥गोधूमः।सुमनाः॥मारुतध्वंसीवातहृत्॥यवः।सकधान्ये २८

सितश्मश्रुकइतिप्रसिद्धः॥कफपित्तहरोबलासपित्तहृत्॥मुद्गः।त्रिं८
बीधान्येमुद्गइतिप्रसिद्धः॥कफंबलासंपित्तंहंतिनाशयति॥माष
उडिदइतिप्रसिद्धः।गुर्वनिलापहः॥गुरुर्जडः।अनिलापहः।बृंहणात्
हृत्॥९८॥श्लोक॥राजमाषः।कफंपित्तंहंतिमारुतकोपनः॥कु८
लित्थोमारुतश्वासकासश्रमकफापहः॥९९॥टीका॥राजमाषः।च
वलः॥बलासंपित्तंचहंति॥मारुतकोपनः।वायुदोषकृत्॥कुलित्थः
कुलिदः।मारुतश्वासकासश्रमकफापहः॥मारुतोवायुः।श्वासः।श्वसनं
॥कासः।कसनंश्रमंवार्यीकफोबलासः।तत्हृत्॥९९॥श्लोक॥चण८
कोवातश्लेष्मपित्तहृत्त्वग्दोषकुष्ठहृत्॥मसूरःकफपित्तघ्नोरक्त८
पित्तज्वरापहः॥१००॥टीका॥चणकः।प्रसिद्धः।वातलोवायुदः॥
श्लेष्मपित्तहृत्॥कफपित्तापहा॥त्वग्दोषकुष्ठहृत्त्वग्रोगहा॥म
सूरोप्रसिद्धः।कफपित्तघ्नोबलासपित्तहृत्॥रक्तपित्तज्वरप

हा॥रक्तपित्तंमस्तिष्कंज्वरस्तापःतत्हन्॥१००॥आटकीक उरीवारणे
फपित्तघ्नीकस्तायोनीत्रकोपनः॥वातश्लेष्महणोवह्नेर्बल्यश्च वातगुणाः
ह्यतजिन्नित्यः॥१॥टीका॥आटकीतुवरीकफपित्तघ्नीबल्या
पित्तहन्त्री॥कषायःवर्णाग्निकोपनोवायुदोषहृत्॥ २९
वह्निःपावना॥वातलोवायुदः॥हृद्यःपौष्टिकः॥नित्यःप्रसिद्धः॥
बल्यहृद्यबल्यकारी॥वातजित्वायुहृत्॥१॥श्लोक॥पथ्योयवान जोधजेस
लोरूक्षःसजोविष्टंभहृत्लघुः॥पथ्यंवर्षोषितंधान्यंतदुषः॥ जगुरेगुणाः
स्वगुणप्रदः॥२॥टीका॥यावनालःजोधजा॥पथ्यःसर्वदा
श्यःरूक्षःस्नेहहीनः॥वायुकृदित्यर्थः॥सजोसिजगुरः॥विष्टं
भहृत्॥मलमूत्रादिसंग्रहहृत्लघुःसुखजीर्यः॥वर्षोषितंसं
वत्सरातीतं॥धान्यंधान्यमात्रं॥पथ्यंगुणदं॥तदूषःतद्ध २९
न्यजातदूषः॥क्वाथभेदः॥स्वगुणप्रदःतद्धान्योक्तगुणहृत्॥२

॥श्लोक॥कांजीरुच्यःसरोभेदीपित्तजीर्णहरोलघुः॥श्रमकृम
हरोवक्त्रेधृत्यादुर्मल्लशोषजित्॥३॥टीका॥कांजीआरनाल॥८
च्योरुचिहृत्॥सरःसारकः॥भेदीभेदकः॥पित्तजीर्णहरःपित्तवि
ष्टंभिकाहृत्॥लघुःगुरुः॥श्रमकृमहरः॥श्रमेअध्वादिदुःखं॥
कृमइंद्रियग्लानिस्तद्धरंतद्धृतं॥वक्त्रेमुखेधृत्याधारणेन
॥दुर्मल्लशोषजित्॥दुर्मल्लोदुष्टोजिकादिस्थोमल्लः॥शोषोमु
खशुष्कता॥तज्जित्तद्धृत॥३॥इतिधान्यदूषगुणाः॥०॥
अथश्लोकषट्केनमांसगुणानाह॥श्लोक॥मांसंसद्योहतात्रु मांसगुणाः
जेवल्यंरघ्ययथगुणं॥लोहितस्यामियंकोसंग्राह्येणस्यावि
वातलं॥४॥टीका॥मांसमिति॥सद्योहतात्रुजंसद्यस्तत्काल
एवहतात्मारितात्॥अरुजोरोगरहितात्॥पशुपक्ष्यादिजीवसं ९॥
भवात्॥जातंमांसंमामिषं॥बल्यंबलकरं॥रघ्यंपुष्टिकृत्॥य

थागुणंतत्जीवोत्तमांसगुणप्रदं॥रोहिषस्यरोहितमृगस्यआमि
षंमांसंकोलंकिंचिदल्पेयंग्राहीग्राहकं॥एणस्यहरिणस्यापिआ
मिषंवातत्वंवायुप्रदं॥४॥श्लोक॥दोषत्वंवह्नितन्मेषांत्वग्दोषत्व
मजामिषं॥कोलंग्राह्यहिमंचैवचिकिच्छितरोगामिषं॥५॥ही
का॥मेषंएडकजंमांसं॥दोषंवातादिप्रदं॥वह्निहरनवजित्॥
अजामिषंछागमांसं॥त्वग्दोषदंकुष्ठादिरोगदं॥कोलंवराहमांसं
ग्राहीग्राहकं॥अहिमं॥अग्नेयवीर्यंच॥रोगामिषंप्रतनोविलेपः॥
शशोरक्तस्यामांसंआमिषं॥किंचिदौक्तशीतेसौम्यहिममित्यर्थः॥५
॥श्लोक॥कुक्कुटस्यामिषंसर्वमयघ्नंचोरुमंडकं॥वातविनिद्रयोः कुक्कुटादि
शीतंदोषघ्नंचांडकंगुरु॥६॥कुक्कुटस्यताम्रचूडस्याआमिषंमांसं पक्षिमांस
॥सर्वमयघ्नंरोगमात्रजित्॥तस्यैवअंडकंगर्भकोशः॥उरुमाग्नि
वीर्यंच॥वातविनिद्रयोः॥वातोत्तरकः॥निद्रानिद्रितस्तरः॥तयोर्मां ३०
संशीतंहिमवीर्यंदोषघ्नंवातादिजित्॥चअंडकंतयोरेवगर्भकोशः

॥गुरुजडं॥६॥श्लोक॥कापिंजलमस्यिनांतोयस्थगतादिनां
तत्वं॥मायूरमपिमद्यस्यवातत्वंदोषकृद्गुरु॥७॥टीका॥कपिंज
लोगौरवर्णस्तित्तिरीभेरुकस्यमांसं॥अस्थ्यिनांतोयस्थगतादीनां
अस्थकुपितरक्तपित्तं॥अतिवातकुवातरक्तं॥तद्धरीतन्नाशकं॥मा
यूरंस्त्रीतिमांसमपिशीतत्वंहिमवीर्यं॥मत्स्यस्यमीनस्यमांसंवा
तत्वंवायुरंदोषकृत्वातादिदोषकारी॥गुरुजडंच॥७॥श्लोक॥
कर्कट्याःपरमंहृष्यंरक्तांकुटदोषजं॥मधुरंतरुणानांचबा
लानांचकषायकं॥८॥टीका॥कर्कट्याःकुलीरस्त्रियःमांसंप
रमउत्कृष्टंहृष्यंपुष्टिकरंवृद्धानांपक्षिजलचरादीनांमां
संकुटकुटरसंदोषजंवातादिप्रकोपकरंच॥तरुणानांपक्षा
दीनांमांसंमधुरंस्वादुरसं॥बालानांपक्षादीनांपूर्ववयस्कानां
मांसंकषायंतुवरंसंसचेति॥८॥श्लोक॥पक्षिपुंस्तांतिमार्ध
स्तुंचतुष्पत्स्त्र्यारिमार्धगं॥लघ्वन्यदुरुरोरोषंशिरःशोफारि

गंगुरुः॥९॥टीका॥पक्षिपुंप्रांतिमार्धस्थ॥पक्षिषुखेचरेषुयेपुंमां
सःपुरुषास्तेषांप्रांतिमंपश्चात्मंयरर्धखंडंतत्रस्थंस्थितंमांसंत
३१ थाचतुष्पत्स्त्र्यादिमार्धगंचतुष्पदेषुपशुषुयाःस्त्रियोनार्यःतासं
बांआदिमंप्राच्यंयरर्धंतत्रगतंयन्मांसंचलघुसुपक्वंअन्यम
ध्यभागस्थितंगुरुजडं॥रोपंभुजशिरःस्फिरःश्रोफारिगंशिरो
मूर्धाःश्रोफःशिश्नंआदिनासंकथादिसंग्रहस्तोषंगेषुस्थितंमां
संगुरुजडमिति॥९॥इतिमांसवर्गः॥ ॥अथैकेनश्लोकेनप्रक
णार्थमुपसंहरति॥श्लोक॥जातंश्रीरंगनाथस्यमुकुरेनेतिसू
नुना॥इत्यज्ञतेहतेश्लोपचारसारेनिरूपणं॥१०॥जातमिति॥इ
तिपूर्वोक्तप्रकारेणश्रीरंगनाथस्यतत्संज्ञकदैवज्ञस्यसूनुनापुत्रे
णमुकुंदेनमुकुंदाभिधदैवज्ञेनहृतेरचितेअस्मिन्उपचारसारे
तत्संज्ञकेग्रंथेइत्यज्ञतेः॥परार्थज्ञानस्यनिरूपणंकथनंजातंसमाप्तिं ३१
गतमिति॥इतिगूढप्रकाशिकायांपरार्थज्ञानप्रकरणंसमाप्तं॥इतिश्रीमथ

माधिकारः॥समाप्तिमगमत्॥गंगानंतसूतोवादीटीकांगूढप्रकाशि
कां॥परार्थज्ञानचक्षुश्चमुकुरस्यहृतौकिल॥श्रीलक्ष्मीव्यंकटेशा॥०
॥ ॥अथरोगव्यक्तिनिरूपणं॥श्लोक॥अपराचारतःकचाःक्षुद्राःपलि मलकरो
तंकेशाःकृताः॥इंद्रलुप्तंकचैःक्षुण्णेदृलीच्युतकचामलात्॥१॥टी॰ गनिधानं
॥अथद्वितीयाधिकारेमलकारिव्याधिमात्रस्यस्वरूपकथनमाह॥ केशादिः
अपचारादिति॥अपचारात्उपचारः॥केशसंस्कारः॥अपचारस्त
द्विपरीतस्तस्मात्॥कचाःकेशाःक्षुद्राःलघवः॥स्फुटइतियावत्॥स्युरि
तिशेषः॥केशाःकृताः॥केशानांकचानांक्षुद्रताश्चेतत्पलितंवार्ध
क्यंज्ञेयं॥क्षुण्णेदृमिभणितैःकचैःकेशैः॥इंद्रलुप्तंतत्संज्ञकोरोगः
॥मलाद्धातारिदोषात्॥शरीरमलाद्धातुकचाच्युताःनष्टाःकं
चाःकेशाःयस्यांसाटदृलीरित्याख्योव्याधिर्ज्ञेयाः॥१॥शिरःसि
ध्मारुणकेयूकालीक्षाःशिरःक्रमो॥यूकाघर्मोद्भिणःशीर्षकाटं
तिजाउर्ध्वशिरःकफे॥२॥टीका॥शिरइतिरारुणकेतत्संज्ञकेरोगे॥

शिरःसिध्माशिरसिसिध्माचतुर्थोत्सर्जनंसिध्मानामवक्ष्यमाणकुष्ठवि
शेषोव्याधिः॥शिरःक्ष्मीशीर्षत्वीटकेरोगेयूकालिक्षाश्चतन्नाम्ना
क्ष्मिविशेषाः॥स्युरित्यर्थः॥शीर्षव्रणःशिरसिव्रणः॥यूकाद्यतौ
यूकादीनांआशिराद्येनलिक्षादीनांसंग्रहः॥तासामार्तिःपीडातट
३२ स्यासत्यांस्यात्॥शिरःकफेनदाह्येरोगेजाड्यंजडताकार्तिः॥
कस्यशिरसःआर्तिःपीडास्यात्॥२॥श्लोक॥शीर्षार्तौसिर्वशीर्ष शिरःअ
र्तिःशिरार्धार्तिःशिरार्धजे॥बाधिर्यमश्रुत्वाच्छ्रुत्यनौपूतिरुट त्रकर्णबो
कूश्रुतेग॥३॥टीका॥शीर्षार्तौमिलकपीडास्यरोगेसर्वशीर्षार्तिः धिर्यादि
संपूर्णशिरःपीडा॥शिरोर्धजेअर्धविभेदकेशिरोर्धार्तिः॥मस्तका
र्धपीडा॥अश्रुत्वात्॥शब्दाश्रवणात्॥बाधिर्यंबधिरता॥श्रुत्यौ
नौकर्णरोगे॥श्रुतेःकर्णरंध्रात्॥पूतिरुक्षास्रावोतिश्चास्यादिति
शेषः॥३॥श्लोक॥दृग्रोगेरक्तापीडाकामलेपित्तादृशोः॥अ ३२
क्षिकुसुमंशुक्लंपटलंतिमिरंतथा॥४॥टीका॥दृग्रोगेदृष्टिया नेत्ररोगः

धौरक्तादृशोर्णवर्णत्वंपीडारुक्चकामलेकामलाख्यरोगे॥
दृशोनेत्रयोःपीतहरिद्रावर्णत्वंततथाकुसुंपुष्परुतिभुक्॥
बीजारुतिपटलंजवनिकाकारंतिमिरंतामिस्रंचप्रसिद्धंस्पष्टं॥४
॥श्लोक॥राज्यंधंकुंडकोटाभोवैवर्ण्यभ्रूकचक्षयः॥नासानौसांकु नासिक
रंघ्राणंपीनसेपूतिगंधयुक्॥५॥टीका॥राज्यंधंरात्रावदर्शनं॥ रोगनि॰
कुंडःखर्जनंकोटाभःकृमिजन्यंवैवर्ण्यंप्रकृतिवर्णहानिःभ्रूकच
क्षयःभ्रुकुटीत्वोमनाक्षनःप्रसिद्धएवात्रापिअनुक्तत्वात्स्पष्ट
मितियावत्॥नासानौनासारोगेसांकुरंघ्राणंअंकुरयुक्तंनासिट
का॥नात्रार्षइतिकेचित्॥पीनसपीनसरोगेपूतिगंधयुक्॥पू
तेर्गंधयुक्तंघ्राणंस्यात्॥५॥श्लोक॥श्लेष्मण्यंबुगलत्घ्राणं
नासास्त्रेस्रकृस्रुतिश्चतः॥त्वक्कृच्छ्रेगंडयोर्व्यंगेकामात्यंकिल गंडरोग
कामुरवे॥६॥टीका॥श्लेष्मणीकफरोगेअंबुगलत्घ्राणंजल लक्षणं
स्रावयुतानासाव्यंगंतदाख्योव्याधिःकामात्यंयौवनार्थिटं का

यंमुखेआस्येकीलकाःकंटकास्तुः॥६॥श्लोक॥ओष्ठरोगेसकुष्ठो ओष्ठरोग
थोदंतरोगेसकीटकुः॥स्फोटाजिह्वास्ययोःपाकेत्युपजिह्वोर्ध्वगो दंतरोगादि
धरो॥७॥टीका॥ओष्ठरोगेसकुसतोदःशोथःशोफः॥दंतरोगे
सकीटकुः॥लमिमिःसहपीडा॥जिह्वास्ययोःपाकेरसनामुख
३३ योःपाकेस्फोटाःस्फुटयः॥उपजिह्वातत्सत्कोरोगऊर्ध्वतःउप
रिअधरेधश्चस्यात्॥७॥श्लोक॥तालुकेतालुजिह्वास्तृकुगट तालुजिह्वा
लांतर्गलशुंठियुकुः॥वक्त्रास्त्रेसकुस्कृतिर्वक्त्रभुक्तिर्द्वेमुखार षो
चौ॥८॥टीका॥तालुकेतालुकुः॥तालुजिह्वयोःपरस्परंस्पर्शा
भावः॥गलांतःकंठमध्येव्याधौगलशुंढियुकुः॥गलग्रंथियुक्तस्या
दक्त्रास्त्रेमुखरोगेवक्त्रान्मुखात्सकुस्रुतिःस्रोणितस्रावः॥मुखा
रुचौअन्नानभिलाषेभुक्तिर्द्वेषोभोजनत्यागः॥८॥श्लोक॥ओष्ठे
स तालुगलशुंढकंस्यात्पिपासार्दंतघि॥कासेकुंठरोकंठातमकेपिसु ३३
डुःकफः॥९॥टीका॥ओष्ठास्यरोगेतालुगलौतालुस्थानंकंठश्चशु

ष्कंठसंभवति॥तृषितस्यायंअसकृत्यारंवारंपिपासातृषास्यात्
॥कासेकसनेकुंठरोरवर्जुराब्दोतमकेपिकंठात्गलात्सुडुःकफः॥ कासरोगः
सुष्ठुडुष्टःश्लेष्मास्यात्॥९॥श्लोक॥विस्वरेलघुतःशब्दोहतकफे विस्वरहि
कंठहृन्महः॥१०॥वातोल्लारेवृथोल्लारःसाम्लोल्लारोम्लपित्तके॥१० कारिः—
॥टीका॥विस्वरेस्वरभंगेलघुतःकृष्णत्वात्॥कंठध्वनिः॥हृत्क
फेतदाख्यरोगेकंठहृन्महःगलहृदयरोधः॥वातोल्लारेव्याधौसट
थाजीर्णादिविनाउल्लारःऊर्ध्ववायुप्रवृत्तिः॥अम्लपित्तेरोगे अम्लपित्त
साम्लोल्लारःआम्लरसेनसहवातप्रवृत्तिस्यात्॥१०॥श्लोक॥वा वोत्कारिः
तौवांतिश्चहिक्कहिक्केतिस्वाख्येस्वष्टिथुंकयोः॥ग्रंथिमिर्गंडमाला
स्यकंठेवागलगंडके॥११॥टीका॥वातौवामिरोगेवांतिर्घमिः॥
हिक्कहिक्कायांअतिहिक्काअतिहिक्कने॥स्वष्टिथुंकयोःस्वष्टिथुंकन
चिन्हे॥कंठेगलाद्बहिर्भागेग्रंथिभिःबहुभिर्गंडैःगंडमालरोगः॥
वातजैवैकेनगंडेनगलगंडकंगलगंडव्याधिस्यात्॥इत्यर्थः॥११

श्लोक॥अपचीगलशेरोहिण्यावसाध्येत्वामदोषतः॥मन्यास्तंभेस्वव
क्रतंबाहुस्तंभोवबाहुके॥१२॥टीका॥अपचीगलशेरोहिण्योइमोरो
गोआमदोषतः॥आमदोषजनितेअसाध्येचिकित्से॥मन्यास्तंभेरो
गेस्ववक्रंग्रीवाकुटिलता॥अवबाहुकेबाहुस्तंभेभुजकार्यहानिः
॥१२॥श्लोक॥पृष्ठनत्याधनुर्वातःपक्षाघातेर्धदेहकृत्॥नखवेष्ट
नजापीडानखशेलेषिवैपेणि॥१३॥टीका॥वेष्टनत्याचोपवर्त्तपृ
ष्ठिग्रहेनधनुर्वातिस्तदाख्योरोगः॥पक्षाघातेअर्धंगहतेरोगेअ
र्धदेहकृत्॥देहैकभागेभ्रन्यत्वं॥पर्वनखशेलेअपिचपर्वणिनख
वेष्टनजाकरुहग्रथनमांससंभवापीडाकृत्स्यात्॥१३॥श्लोक श्वासउरो
॥श्वासेश्वासोसकृत्तरःश्वासरोधोप्युरोग्रहे॥गुल्मंग्रथ्योरसृग्दो ग्रहादिः
हावामेप्युन्ननयातया॥१४॥टीका॥श्वासरोगेअसकृद्दीर्घवारं॥ ३४
श्वासःश्वसनं॥उरोग्रहेरोगेउरःश्वासरोधःहृच्छ्वसनस्तंभः॥
उररेजठराभ्यंतरेग्रंथ्यर्बुदाद्रिजनितगोलकेनगुल्मंतदाख्योरो

रं ॥हृत्पित्तेवमथुःस्युक्तोहृद्रुंघातपातनात् ॥१७॥टीका॥॥ हृत्पितादिः
नाभौस्योर्ध्वानिलेकुशोकश्चयथाविधं॥यथास्वंनाभिधंश्रुत्वेत्य
था॥नाभिश्रुत्वनाभिनलश्रुत्वाकुक्षिश्रुत्वाकटिश्रुत्वमित्यर्थः॥हृत्पित्ते
रोगेवमथुर्वांतिःथुक्कःथुक्कनंचाघातपातनात्॥अभिघातात्पतनाच्च
हृद्रुंतरास्योव्याधिर्भवतीतिशेषः॥१७॥श्लोक॥वातपूर्णोदरंरोगं वातोदरा
धोप्याध्मानानाहयोःक्रमात्॥अक्षुन्मांद्येप्यपक्वान्नाजीर्णेसानिलं दिरोगः
त्वंस्वनात्॥१८॥टीका॥वातइति॥आध्मानाहयोःरोगयोःक्रमात्
॥अनुक्रमेणवातपूर्णोदरंवायुपरिनद्धजठरंरोधः॥अधोवायुर्विगुण
श्च॥आध्मानेपूर्णोदरंअनाहेरोधइत्यर्थः॥मांद्येनोअग्निमांद्येरो
गेअक्षुत्वुभुक्षाहानिः॥अपक्वान्नात्॥आमान्नात्॥अजीर्णतरास्यो
व्याधिः॥स्वनात्सशब्दकोष्ठात्॥सानिलंसवातंअजीर्णंस्यात्॥१८
॥श्लोक॥वक्षोधःस्यात्रिरुग्यासेरुमाउदरजंतुरुक्॥सरुड्रोधोसरु
ड्नाभेरूर्ध्वंतत्तोदरं॥१९॥टीका॥वक्षइति॥ग्रासेतरास्योरोगे ३५

वक्षोधःहृद्याधोभागेस्यात्रिरुक्॥वातश्लेष्मोदरेजंतुरुक्जठर
रुमिश्लेः॥नाभेर्नाभिस्थानात्॥ऊर्ध्वंउपरिग्रंथिविच्युतो॥ग्रंथिनिस्र
तोसत्यांत्रारुड्रोधः॥मलावष्टंभः॥ततोनाभेअधरेधःप्ररेरोग्रंथिवि
च्युतो॥सत्यांअसरुड्नाभिःवारंवारंवमिः॥१९॥श्लोक॥पार्श्वेप्यसरु रक्तानिस्र
दत्यांसरुविड्स्रतिग्रंथिविच्युतो॥सशब्दास्योरेकःकासःछर्योप्युप तिः——
तद्रुताः॥२०॥टीका॥पार्श्वेकटिहृदयप्ररेरोग्रंथिविच्युतोसत्यांअस
